# राट्रं संरषयमेव ही

## संस्कृते परिचयः (Introduction)

(विद्यालये बालचराणां शिविरम्। सायं सर्वे स्व-अनुभवान् श्रावयन्ति)

**ध्रुवः** विचित्रः अयं संसारः। केचन महापुरुषाः महात्मागान्धिवत् अहिंसायाः पाठं पाठयन्ति। अन्ये च आणविक-अस्त्राणां निर्माणं विधाय जगतः संहारं कर्तुम् इच्छन्ति।

**सिद्धार्थः** वस्तुतः विज्ञानस्य सत्प्रयोगाः राष्ट्रस्य कल्याणाय, दुरुपयोगश्च विनाशाय भवति।

**सुश्रुतः** आम्, दुरुपयोगः तु अभिशापः एव।

**चरकः** विदितम् अस्ति किं युष्माकं यत् प्राचीनकाले अपि आणविक-अस्त्राणां मानवेषु प्रयोगः निषिद्धः आसीत्।

**ध्रुवः** किं पुरा अपि एतादृशानि अस्त्राणि आसन् येषां मानवेषु प्रयोगः वर्जितः आसीत्।

**सिद्धार्थः** किमिदं सत्यम्? आश्चर्यम्।

**चरकः** प्रत्यक्षं किं प्रमाणम्? 'राष्ट्रं संरक्ष्यमेव हि' अयं पाठः महाभारत-आधारितः। एतं पठित्वा ज्ञास्यामः।

## हिंदी अनुवाद (Hindi Translation)

(विद्यालय में बालकों का शिविर। सायंकाल सभी अपने-अपने अनुभवों को सुनाते हैं)

**ध्रुव** यह संसार अनोखा है। कुछ महापुरुष महात्मा गाँधी की तरह अहिंसा के पाठ को पढ़ाते हैं और अन्य तो आणविक अस्त्रों का निर्माण करके संसार का विनाश करना चाहते हैं।

**सिद्धार्थ** वास्तव में विज्ञान का सही प्रयोग देश की रक्षा के लिए और दुरुपयोग विनाश के लिए होता है।

**सुश्रुत** जी हाँ, दुरुपयोग तो अभिशाप ही है।

**चरक** क्या तुम जानते हो पुराने समय में भी आणविक अस्त्रों का मानवों पर प्रयोग निषिद्ध था।

**ध्रुव** क्या प्राचीनकाल में भी ऐसे अस्त्र थे जिनका प्रयोग मानवों पर वर्जित था?

**सिद्धार्थ** क्या यह सच है? आश्चर्य है!

**चरक** प्रत्यक्ष को प्रमाण की क्या आवश्यकता है? "राष्ट्रं संरक्ष्यमेव हि" यह पाठ महाभारत पर आधारित है। इसे पढ़कर पता लगाएँगे।

## शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**संहारम्**–विनाशम्, विनाश (Destruction)। **दुरुपयोगः**–कुत्सितः उपयोगः, बुरा उपयोग (Wrong use)। **संरक्ष्यम्**–रक्षा-योग्यम्, रक्षा करने योग्य (To be protected)।

## समासाः (Compounds)

अहिंसायाः – न हिंसायाः (नञ् तत्पुरुषः)।
प्रत्यक्षम् – अक्ष्णोः प्रति (अव्ययीभावः)।
महापुरुषाः – महान्तः पुरुषाः (कर्मधारयः)।
सत्प्रयोगः – शोभनः प्रयोगः (कर्मधारयः)।
प्राचीनकाले – प्राचीने काले (कर्मधारयः)।

## सन्धि-विच्छेदः (Disjoin Sandhi)

प्रत्यक्षम् – प्रति + अक्षम् (यणसन्धिः)।
दुरुपयोगश्च – दुरुपयोगः + च (विसर्ग सन्धिः)।

## प्रत्ययाः (Suffixes)

संरक्ष्यम् – सम् + रक्ष् + यत्।
आणविक – अणु + ठक्।
विदितम् – विद् + क्त।
आधारितः – आ + धृ + क्त।
पाठयन्ति – पठ् + णिच् + लट् लकारः।
वस्तुतः – वस्तु + तसिल्।
विधाय – वि + धा + ल्यप्।
वर्जितः – वर्ज् + क्त।
निषिद्धः – नि + सिध् + क्त।
श्रावयन्ति – श्रु + णिच् + लट् लकारः।

## प्रश्नाः (Questions)

**(I) एकपदेन उत्तरत–**

(i) के स्व-अनुभवान् श्रावयन्ति?
(ii) कस्य सत्प्रयोगः राष्ट्रस्य कल्याणाय भवति?

**(II) पूर्णवाक्येन उत्तरत–**

केषाम् प्रयोगः मानवेषु वर्जितः आसीत्?

**(III) भाषिककार्यम्–**

(i) 'एतादृशानि अस्त्राणि' अत्र विशेष्यपदम् किम्?
(क) अस्त्राणि (ख) अस्त्रम् (ग) एतादृशम् (घ) एतादृशानि

(ii) नाट्यांशात् 'ल्यप्' प्रत्ययस्य एकम् उदाहरणं चित्वा लिखत।
(क) विनाशाय (ख) कल्याणाय (ग) विधाय (घ) संरक्ष्यम्

(iii) 'दुरुपयोगः' इति पदस्य विपर्ययः कः?
(क) सदुपयोगः (ख) सत्प्रयोगः (ग) सत्यप्रयोगः (घ) सदुपदेशः

(iv) 'विचित्रः' इति कस्य पदस्य विशेषणम्?
(क) राष्ट्रस्य (ख) विज्ञानस्य (ग) जगतः (घ) संसारस्य

(v) 'इच्छन्ति' इति क्रियायाः कर्तृपदं किम्?
(क) जनाः (ख) छात्राः (ग) अन्ये (घ) केचन

**उत्तराणि–** (I) (i) छात्राः (ii) विज्ञानस्य।
(II) आणविक-अस्त्राणां प्रयोगः मानवेषु वर्जितः आसीत्।
(III) (i) (क) अस्त्राणि (ii) (ग) विधाय (iii) (ख) सत्प्रयोगः (iv) (घ) संसारस्य (v) (ग) अन्ये।

**प्रश्ननिर्माणम्–** (*i*) अयं संसार: **विचित्रो** वर्तते।
(*ii*) अयं पाठ: **महाभारते** आधारित: वर्तते।
(*iii*) **प्राचीने काले** आणविकास्त्राणां मानवेषु प्रयोग: निषिद्ध: आसीत्।
(*iv*) **विज्ञानस्य** तु दुरुपयोग: अभिशाप: एव।
(*v*) पुरा अपि एतादृशानि **अस्त्राणि** आसन्।

**उत्तराणि–**(*i*) कीदृश: (*ii*) कस्मिन् (*iii*) कदा (*iv*) कस्य (*v*) कानि।

**विपर्यय मेलनं कुरुत–**

| (क) शब्दा: | (ख) विपर्यया: |
| --- | --- |
| (1) अहिंसाया: | (*i*) विनाशम् |
| (2) सत्प्रयोग: | (*ii*) वरदानम् |
| (3) विनाशाय | (*iii*) हिंसाया: |
| (4) प्रत्यक्षम् | (*iv*) सायम् |
| (5) अभिशाप: | (*v*) कल्याणाय |
| (6) निर्माणम् | (*vi*) दुरुपयोग: |
| (7) प्रात: | (*vi*) परोक्षम् |

**उत्तराणि–**(1) (*iii*) हिंसाया: (2) (*vi*) दुरुपयोग: (3) (*v*) कल्याणाय (4) (*vi*) परोक्षम् (5) (*ii*) वरदानम् (6) (*i*) विनाशम् (7) (*iv*) सायम्।

# राष्ट्रं संरक्ष्यमेव हि
## (निश्चय से राष्ट्र की रक्षा करनी चाहिए)

**(1)**

*(तत: पुत्रशोकसन्तप्ता: युधिष्ठिर: भीम: द्रौपदी च रणभूमौ प्रविशन्ति।)*

**द्रौपदी** *(दीर्घं नि:श्वस्य) हा हन्त। किम् इदं घोरम् आपतितम्। पापकर्मणा द्रौणिना मे पुत्रा: भ्रातर: च हता:। अग्नि: इव दहति माम् अयं शोक:।*

**युधिष्ठिर:** *शुभे! धैर्यं धारय। नूनं तव पुत्रा: वीरगतिम् एव प्राप्ता:। वीरजननी त्वं शोचितुं न अर्हसि।*

**द्रौपदी** *कथं मन्दभाग्या अहं धैर्यं धारयामि। यावत् असौ क्रूरकर्मा न दण्ड्यते, तावत् अहम् इत: न गमिष्यामि, अत्रैव प्राणत्यागं च करिष्यामि।*

**युधिष्ठिर:** *प्रिये! मा एवं ब्रूया: स पापकर्मा कुत्र गत:, इति न जानीम:। अतिदूरं किञ्चिद् दुर्गमवनं प्रविष्ट: भवेत्।*

**द्रौपदी** *(भीमं प्रति) आर्यपुत्र! क्षत्रधर्मम् अनुस्मरन् मां शोकसागरात् रक्ष। अस्मिन् संसारे कश्चित् अपि त्वया सदृश: पराक्रमी नास्ति। पुरा वारणावते त्वमेव पाण्डवान् रक्षितवान्। विराट-नगरे अपि त्वं मां प्राणसंकटात् उद्धृतवान्।*

### हिंदी अनुवाद (Hindi Translation)

(तब पुत्रशोक से सन्तप्त युधिष्ठिर, भीम और द्रौपदी रणभूमि में प्रवेश करते हैं।)

**द्रौपदी** (लम्बी साँस लेकर) अरे! खेद है। यह कितना घोर पाप है। पापी द्रोणपुत्र ने मेरे पुत्र और भाई मार डाले। यह शोक मुझे आग की भाँति जला रहा है।

**युधिष्ठिर** कल्याणी! धैर्य धारण करो। निश्चित रूप से तुम्हारे पुत्र वीरगति को ही प्राप्त हुए हैं। वीरों की माता तुम शोक करने योग्य नहीं हो।

**द्रौपदी** मैं अभागिनी किस प्रकार धैर्य धारण करूँ। जब तक यह कुकर्मी दण्डित नहीं किया जाता, तब तक मैं यहाँ से नहीं जाऊँगी और यहीं पर प्राणत्याग करूँगी।

**युधिष्ठिर** प्रिये! ऐसा मत बोलो। वह पापी कहाँ गया, यह नहीं जानते। बहुत दूर किसी घने वन में प्रवेश कर गया हो।

**द्रौपदी** (भीम की ओर) आर्यपुत्र! क्षत्रिय धर्म का पालन करते हुए शोकसागर से मेरी रक्षा करो। इस संसार में कोई भी तुम्हारे सदृश पराक्रमी नहीं है। पहले वारणावत में तुम्हीं ने पाण्डवों की रक्षा की थी। विराट-नगर में भी तुमने मुझे प्राणसंकट से बचाया था।

### शब्दार्था: (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**द्रौणिना–**द्रोणपुत्रेण, द्रोण के पुत्र द्वारा (By Drona's Ashwatthama)। **इत:–**अत्रत्य:, यहाँ से (From here)। **पराक्रमी–**वीर:, ताकतवर (Brave)। **उद्धृतवान्–**रक्षितवान्, बचाया (Saved)।

### समासा: (Compounds)

पुत्रशोकसंतप्ता: – पुत्राणाम् शोक: (षष्ठी तत्पुरुष:) तेन संतप्ता: (तृतीया तत्पुरुष:)।
वीरगतिम् – वीराणाम् गतिम् (षष्ठी तत्पुरुष:)। वीरजननी – वीराणाम् जननी (षष्ठी तत्पुरुष:)।
क्रूरकर्मा – क्रूरं कर्म यस्य स: (बहुव्रीहि:)। क्षत्रधर्मम् – क्षत्राणाम् धर्मम् (षष्ठी तत्पुरुष:)।
शोकसागरात् – शोक: सागर: इव, तस्मात् (कर्मधारय:)। प्राणत्यागम् – प्राणानाम् त्यागम् (षष्ठी तत्पुरुष:)।
मन्दभाग्या – मन्द: भाग्य: यस्या: सा (बहुव्रीहि:)।

### सन्धि-विच्छेद: (Disjoin Sandhi)

अत्रैव – अत्र + एव (वृद्धिसन्धि:)। कश्चित् – क: + चित् (विसर्गसन्धि:)।
किञ्चिद् – किम् + चित् (परसवर्ण सन्धि:)। उद्धृतवान् – उत् + धृतवान् (जश् सन्धि:)।

**प्रत्ययाः (Suffixes)**

| | | | | | |
|---|---|---|---|---|---|
| गतिम् | – गम् + क्तिन्। | निश्वस्य | – निस् + श्वस् + ल्यप्। | प्राप्ताः | – प्र + आप् + क्त। |
| शोचितुम् | – शुच् + तुमुन्। | मन्दभाग्या | – मन्दभाग्य + टाप्। | गतः | – गम् + क्त। |
| अनुस्मरन् | – अनु + स्मृ + शतृ। | उद्धृतवान् | – उत् + धृ + क्तवतु। | सन्तप्ताः | – सम् + तप् + क्त। |
| प्रविष्टः | – प्र + विश् + क्त। | पराक्रमी | – पराक्रम + इन्। | रक्षितवान् | – रक्ष् + क्तवतु। |
| हताः | – हन् + क्त। | | | | |

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**

केन द्रौपद्याः पुत्राः हताः?

**(II) पूर्णवाक्येन उत्तरत–**

(*ii*) कः संसारे परमपराक्रमी आसीत्।

(*iii*) के वीरगतिम् प्राप्ताः?

**(III) भाषिककार्यम्–**

(*i*) 'अनुस्मरन्' पदे कः प्रत्ययः?

(क) शानच् (ख) शतृ (ग) क्त (घ) क्तवतु

(*ii*) 'रक्षितवान्' क्रियापदस्य कर्तृपदं किम्?

(क) त्वम् (ख) त्वमेव (ग) वचम् (घ) अहम्

(*iii*) 'जानीमः' इति पदे का मूलधातुः?

(क) ज्ञा (ख) जन् (ग) जान् (घ) जा

(*iv*) 'मन्दभाग्या' इति कस्याः विशेषणम्?

(क) नार्याः (ख) जनन्याः (ग) राज्ञायाः (घ) द्रौपद्याः

(*v*) 'त्वम् विराटनगरे अपि मां प्राणसंकटात् उद्धृतवान् आसीत्' इत्यत्र 'माम्' पदस्य प्रयोगः कस्मै अभवत्?

(क) भीमाय (ख) युधिष्ठिराय (ग) अर्जुनाय (घ) द्रौपद्यै

**उत्तराणि–** (I) द्रौणिना।

(II) (*i*) भीमः संसारे परमपराक्रमी आसीत्। (*ii*) द्रौपद्याः पुत्राः वीरगतिम् प्राप्ताः।

(III) (*i*) (ख) शतृ (*ii*) (क) त्वम् (*iii*) (क) ज्ञा (*iv*) (घ) द्रौपद्याः (*v*) (घ) द्रौपद्यै।

**प्रश्ननिर्माणम्–** (*i*) त्वमेव **पाण्डवान्** रक्षितवान्। (*ii*) तव पुत्राः **वीरगतिं** प्राप्ताः।

(*iii*) **द्रौणिना** मम पुत्राः हताः। (*iv*) माम् अयं **शोकः** अग्निः इव दहति।

**उत्तराणि–**(*i*) कान् (*ii*) किम् (*iii*) केन (*iv*) कः।

**( 2 )**

***भीमः*** *(युधिष्ठिरं प्रति) भ्रातः! द्रौणिम् अनुगन्तुं मह्यम् अनुमतिं ददातु भवान्।*

***युधिष्ठिरः*** *गच्छ वत्स! विजयी भव, नकुलः तव सारथिः भवतु। (भीमसेनः निर्गच्छति, श्रीकृष्णः अर्जुनेन सह प्रविशति)*

***श्रीकृष्णः*** *भो धर्मराज! समीचीनं न कृतं भवता। पुत्रशोकविह्वलः भीमसेनः एकाकी एव द्रौणिं हन्तुम् अभिधावति।*

***युधिष्ठिरः*** *भगवन्! सः तु एकाकी एव द्रोणपुत्राय अलम्।*

***श्रीकृष्णः*** *वत्स! न जानाति भवान् द्रौणेः चपलां प्रकृतिम्। पितुः द्रोणात् प्राप्तं ब्रह्मशिरो नाम अस्त्रं विद्यते तस्य पार्श्वे। यदि तत् प्रयुज्यते, सर्वा पृथ्वी दग्धा स्यात्।*

***युधिष्ठिरः*** *अप्येवम्! आचार्येण कीदृशः अनर्थः कृतः। किं चपलबालकेभ्यः एतादृश-भीषणानाम् अस्त्राणां प्रदानम् उचितम्?*

## हिंदी अनुवाद (Hindi Translation)

**भीमः** (युधिष्ठिर की ओर) भाई! द्रौणी का पीछा करने के लिए आप मुझे आज्ञा दें।

**युधिष्ठिर** जाओ वत्स! विजयी हो, नकुल तुम्हारा सारथी हो।

(भीमसेन निकलता है, अर्जुन के साथ श्रीकृष्ण प्रवेश करता है।)

**श्रीकृष्ण** हे धर्मराज! आपने उचित नहीं किया। पुत्रशोक से दुःखी भीमसेन अकेला ही अश्वत्थामा को मारने के लिए उसका पीछा कर रहा है।

**युधिष्ठिर** भगवन्! वह तो अकेला ही द्रोणपुत्र के लिए पर्याप्त है।

**द्रौपदी** वत्स! आप अश्वत्थामा के चंचल स्वभाव को नहीं जानते। उसके पास पिता द्रोण से प्राप्त ब्रह्मशिरा नाम का अस्त्र है। उसे यदि प्रयोग किया जाए तो सारी पृथ्वी भस्म हो सकती है।

**युधिष्ठिर** ऐसा भी है! आचार्य ने कैसा अनर्थ कर दिया। क्या चंचल बालों को ऐसे भीषण अस्त्र प्रदान करना उचित है।

## शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**अनुमतिम्**–आज्ञाम्, आदेश (Order)। **समीचीनं**–उचितम्, ठीक (Right)। **विह्वलः**–दुःखी, व्याकुल (Distressed)। **प्रकृतिम्**–स्वभावम्, स्वभाव को (Nature)।

## समासाः (Compounds)

धर्मराज – धर्मं राजते यः सः, सम्बोधने (बहुव्रीहिः)। चपलबालकेभ्यः – चपलेभ्यः बालकेभ्यः (कर्मधारयः)।

अनर्थः – न अर्थः (नञ् तत्पुरुषः)।

पुत्रशोकविह्वल – पुत्रस्य शोकः (षष्ठी तत्पुरुषः), तेन विह्वलः (तृतीया तत्पुरुषः)।

## सन्धि-विच्छेदः (Disjoin Sandhi)

निर्गच्छति – निः + गच्छति (विसर्ग सन्धिः)। अप्येवम् – अपि + एवम् (यण् सन्धिः)।

## प्रत्ययाः (Suffixes)

| | | | | | |
|---|---|---|---|---|---|
| विजयी | – विजय + इन्। | कृतम् | – कृ + क्त। | प्रकृतिम् | – प्र + कृ + क्तिन्। |
| हन्तुम् | – हन् + तुमुन्। | एकाकी | – एकाक + इन्। | प्रदानम् | – प्र + दा + ल्युट्। |
| दग्धा | – दह् + क्त + टाप्। | चपलाम् | – चपल + टाप्। | सर्वा | – सर्व + टाप्। |
| अनुगन्तुम् | – अनु + गम् + तुमुन्। | प्राप्तम् | – प्र + आप् + क्त। | | |

## प्रश्नाः (Questions)

**(I) एकपदेन उत्तरत–**

(*i*) द्रौणेः स्वभावः कीदृशः अस्ति? (*ii*) अर्जुनेन सह कः प्रविशति?

**(II) पूर्णवाक्येन उत्तरत–**

केभ्यः केषाम् प्रदानम् न उचितम्?

**(III) भाषिककार्यम्–**

(*i*) अत्र 'अलम्' योगे का विभक्तिः प्रयुक्ता?

(क) तृतीया (ख) पञ्चमी (ग) चतुर्थी (घ) द्वितीया

(*ii*) 'सर्वा पृथ्वी' अनयोः पदयोः विशेषणपदम् किम्?

(क) सर्वा (ख) पृथिवी (ग) पृथ्वी (घ) सर्व

(*iii*) 'समीपे' इत्यर्थे किं पदं प्रयुक्तम्?

(क) निकटे (ख) पार्श्वे (ग) निकषा (घ) सामीप्ये

(*iv*) 'विजयी' पदस्य प्रयोगः कस्मै अभवत्?

(क) द्रौपद्यै (ख) अर्जुनाय (ग) श्रीकृष्णाय (घ) भीमसेनाय

(*v*) 'जानाति' क्रियायाः कर्तृपदं किम्?

(क) भवान् (ख) श्रीकृष्णः (ग) द्रौणैः (घ) प्रकृतिम्

(*vi*) 'नकुलः तव सारथिः भवतु' अत्र 'तव' सर्वनामपदस्य प्रयोगः कस्मै अभवत्?

(क) अर्जुनाय (ख) श्रीकृष्णाय (ग) भीमाय (घ) नकुलाय

**उत्तराणि–** (I) (*i*) चपलः (*ii*) श्रीकृष्णः।

(II) चपलबालकेभ्यः एतादृश–भीषणानाम् अस्त्राणाम् प्रदानम् न उचितम्।

(III) (*i*) (ग) चतुर्थी (*ii*) (क) सर्वा (*iii*) (ख) पार्श्वे (*iv*) (घ) भीमसेनाय (*v*) (क) भवान् (*vi*) (ग) भीमाय।

**प्रश्ननिर्माणम्–** (*i*) सर्वा पृथ्वी **दग्धा** स्यात्।

(*ii*) नकुलः **तव** सारथिः भवत्।

(*iii*) भवान् द्रौणैः च **चपलां** प्रकृतिम् न जानाति।

(*iv*) अवक्रता **वाचि** अपि भवेत्।

**उत्तराणि**–(*i*) कीदृशी (*ii*) कस्य (*iii*) कीदृशीम् (*iv*) कस्मिन् / कस्याम्।

**( 3 )**

***श्रीकृष्णः*** *शृणु तावत्, आचार्येण तु प्रियशिष्याय अर्जुनाय एव प्रीत्या मनसा ब्रह्मास्त्रशिक्षा प्रदत्ता किन्तु पुत्रप्रेम-पराधीनेन तेन अश्वत्थामा अपि तच्छिक्षया वञ्चितः न कृतः।*

***अर्जुनः*** *अपरं च, अस्त्रशिक्षाप्रदानात् पूर्वम् आचार्यः पुत्रं सावधानम् अकरोत् यत्–*

***परमापद्गतेनापि नैव तात त्वया रणे।***
***इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः॥1॥***

## हिंदी अनुवाद (Hindi Translation)

**श्रीकृष्ण** तो सुनिए, आचार्य ने तो प्यारे शिष्य अर्जुन को ही प्रेम से (प्रसन्न होकर) ब्रह्मास्त्र शिक्षा प्रदान की थी किन्तु पुत्र-प्रेम के वशीभूत होकर उसने अश्वत्थामा को भी उस शिक्षा से वञ्चित नहीं किया।

**अर्जुन** और भी, अस्त्र शिक्षा देने से पूर्व आचार्य ने पुत्र को सावधान किया था कि–
हे पुत्र! अत्यधिक संकट आने पर भी तुम्हें रणभूमि में इस अस्त्र का प्रयोग विशेष रूप से मनुष्यों पर नहीं करना चाहिए।

## अन्वय: (Prose-order)

**परमापद्गतेनापि नैव तात त्वया रणे।**
**इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषत:॥1॥**

तात! (*i*) ........................ अपि त्वया (*ii*) ........................ इदम् अस्त्रम् (*iii*) ........................ मनुषेषु न (*iv*) ........................ प्रयोक्तव्यम्।

**मञ्जूषा–** रणे, एव, परमापद्गतेन, विशेषत:

**उत्तराणि–**(*i*) परमापद्गतेन (*ii*) रणे (*iii*) विशेषत: (*iv*) एव।

## शब्दार्था: (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**प्रीत्या**–प्रेरणा, प्रेम से (By love)। **रणे**–युद्धे, युद्ध में (In the battle)। **परमापद्गतेन**–परमविपद्प्राप्तेन, अत्यधिक संकट में होने पर भी (Despite being in deep trouble)।

## संस्कृते भावार्थ: (Summary)

**परमापद्गतेनापि नैव तात त्वया रणे।**
**इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषत:॥1॥**

अर्थात्–(*i*) ........................ शिक्षाप्रदानात् पूर्वम् आचार्य: द्रोण: स्वपुत्रम् सावधानम् कुर्वन् अकथयत् यत्–हे पुत्र! अत्यधिके (*ii*) ........................ आगते सति अपि त्वम् (*iii*) ........................ अस्य अस्त्रस्य प्रयोगम् विशेषरूपेण (*iv*) ........................ न कुर्या:।

**मञ्जूषा–** सङ्कटे, मनुष्येषु, रणभूमौ, ब्रह्मास्त्रस्य

**उत्तराणि–**(*i*) ब्रह्मास्त्रस्य (*ii*) सङ्कटे (*iii*) रणभूमौ (*iv*) मनुष्येषु।

## समासा: (Compounds)

ब्रह्मास्त्र शिक्षा – ब्रह्मास्त्रस्य शिक्षा (षष्ठी तत्पुरुष:)। परमापद् – परमम् आपत् (कर्मधारय:)।
प्रियशिष्याय – प्रियाय शिष्याय (कर्मधारय:)। सावधानम् – अवधानेन सह (अव्ययीभाव:)।
पुत्रप्रेम पराधीनेन – पुत्रस्य प्रेम (षष्ठी तत्पुरुष:), तस्य पराधीनेन (षष्ठी तत्पुरुष:)।

## सन्धि-विच्छेद: (Disjoin Sandhi)

ब्रह्मास्त्र – ब्रह्म + अस्त्र (दीर्घसन्धि:)। तच्छिक्षया – तत् + शिक्षया (छत्वसन्धि:)।
गतेनापि – गतेन + अपि (दीर्घसन्धि:)। नैव – न + एव (वृद्धि सन्धि:)।

## प्रत्यया: (Suffixes)

कृत: – कृ + क्त।
प्रदत्ता – प्र + दा + क्त + टाप्।
वञ्चित: – वञ्च् + क्त।
प्रयोक्तव्यम्– प्र + युज् + तव्यत्।
विशेषत: – विशेष + तसिल्।

## प्रश्ना: (Questions)

**(I) एकपदेन उत्तरत–**

(*i*) आचार्येण प्रीत्या मनसा कस्मै ब्रह्मास्त्र-शिक्षा प्रदत्ता? (*ii*) पुत्र-प्रेम पराधीन: क: आसीत्?

**(II) पूर्णवाक्येन उत्तरत–**

अस्त्रशिक्षाप्रदानात् पूर्वम् आचार्य: पुत्रं किम् अकथयत्?

**(III) भाषिककार्यम्–**

(*i*) अत्र 'आचार्य:' पदं कस्मै प्रयुक्तम्?
(क) द्रोणिने (ख) द्रोणाय (ग) गुरवे (घ) साधवे
(*ii*) 'इदम् अस्त्रम्' अत्र किम् विशेष्यपदम्?
(क) इदम् (ख) अस्त्र: (ग) अस्त्र (घ) अस्त्रम्
(*iii*) 'मनसा' इति पदं कस्याम् विभक्तौ अस्ति?
(क) प्रथमा (ख) द्वितीया (ग) तृतीया (घ) चतुर्थी
(*iv*) 'प्रियशिष्याय' इति कस्य पदस्य विशेषणम्?
(क) युधिष्ठिराय (ख) भीमाय (ग) अर्जुनाय (घ) नकुलाय

**उत्तराणि–** (I) (*i*) अर्जुनाय (*ii*) द्रोणाचार्य:।
(II) अस्त्रशिक्षाप्रदानात् पूर्वम् आचार्य: पुत्रम् अकथयत्–'तात! त्वया रणे परमापद्गतेन अपि विशेषत: मानुषेषु इदम् अस्त्रं नैव प्रयोक्तव्यम्।'
(III) (*i*) (ख) द्रोणाय (*ii*) (घ) अस्त्रम् (*iii*) (ग) तृतीया (*iv*) (ग) अर्जुनाय।

**प्रश्ननिर्माणम्**– (*i*) **आचार्येण** प्रियशिष्याय अर्जुनाय ब्रह्मास्त्रं शिक्षितम्।
(*ii*) सः **अश्वत्थामाम्** अपि वञ्चितं न कृतवान्।
(*iii*) **आचार्यः** पुत्रं सावधानम् अकरोत्।
(*iv*) इदम् अस्त्रं **मानुषेषु** न प्रयोक्तव्यम्।

**उत्तराणि**–(*i*) केन (*ii*) कम् (*iii*) कः (*iv*) केषु।

**( 4 )**

***युधिष्ठिरः*** *सम्प्रति आश्वस्तः अस्मि। मन्ये सः ब्रह्मास्त्रप्रयोगं न करिष्यति।*

***श्रीकृष्णः*** *तर्हि न जानासि तस्य मनोवृत्तिम्। पितुः उपदेशेन असंतुष्टः स एकदा द्वारकापुरीम् आगच्छत्। ब्रह्मास्त्रं दत्त्वा सः सुदर्शनचक्रम् अवाञ्छत्।*

***युधिष्ठिरः*** *(साश्चर्यम्) कथं चक्रम् इति!*

***श्रीकृष्णः*** *आम्! मया कथितम्। नाहं त्वत्तः ब्रह्मास्त्रम् इच्छामि। यदि त्वं मम गदां, शक्तिं, धनुः चक्रं वा इच्छसि, तुभ्यं ददामि।*

***युधिष्ठिरः*** *ततस्ततः।*

***श्रीकृष्णः*** *स तु चक्रम् एव अयाचत। गृहाण चक्रम् इति उक्तः सः सव्येन पाणिना चक्रम् गृहीतवान्, किन्तु सः तत् चक्रं स्वस्थानात् संचालयितुम् अपि समर्थः न अभवत्।*

## हिंदी अनुवाद (Hindi Translation)

**युधिष्ठिर** अब मैं आश्वस्त हूँ। मानता हूँ कि वह ब्रह्मास्त्र का प्रयोग नहीं करेगा।

**श्रीकृष्ण** तो उसकी मनोवृत्ति नहीं जानते। पिता के उपदेश से असन्तुष्ट होकर वह एक बार द्वारकापुरी आया था। ब्रह्मास्त्र मुझे देकर उसने सुदर्शनचक्र चाहा।

**युधिष्ठिर** (आश्चर्य सहित) क्या चक्र!

**श्रीकृष्ण** हाँ! मैंने कहा। मैं तुमसे ब्रह्मास्त्र नहीं चाहता हूँ। यदि तुम मेरी गदा, शक्ति, धनु अथवा चक्र चाहते हो, तुम्हें देता हूँ।

**युधिष्ठिर** तब-तब।

**श्रीकृष्ण** उसने तो चक्र ही माँगा। चक्र लै लो, इस प्रकार कहे जाने पर उसने बाएँ हाथ से चक्र ले लिया, किन्तु वह उस चक्र को अपने स्थान से चलाने में समर्थ नहीं हुआ।

## शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**आश्वस्तः**–विश्वस्तः, विश्वस्त (Faithful)। **सव्येन पाणिना**–वामेन हस्तेन, बाएँ हाथ से (By left hand)। **समर्थः**–योग्यः, समर्थ (Able)।

## समासाः (Compounds)

असंतुष्टः – न संतुष्टः (नञ् तत्पुरुषः)।
सव्येन पाणिना – सव्यपाणिना (कर्मधारयः)।
मनोवृत्तिम् – मनसः वृत्तिम् (षष्ठी तत्पुरुषः)।
साश्चर्यम् – आश्चर्येण सह (अव्ययीभावः)
ब्रह्मास्त्रप्रयोगम् – ब्रह्मास्त्रस्य प्रयोगम् (षष्ठी तत्पुषः)।

## सन्धि-विच्छेदः (Disjoin Sandhi)

| | | | |
|---|---|---|---|
| मनोवृत्तिम् | – मनः + वृत्तिम् (विसर्ग सन्धिः)। | ब्रह्मास्त्रम् | – ब्रह्म + अस्त्रम् (दीर्घ सन्धिः)। |
| ततस्ततः | – ततः + ततः (विसर्ग सन्धिः)। | नाहम् | – न + अहम् (दीर्घ सन्धिः)। |

**प्रत्यया: (Suffixes)**

दत्वा – दा + क्त्वा। उक्त: – वच् + क्त। कथितम् – कथ् + क्त।

संचालयितुम् – सम् + चल् + णिच् + तुमुन्। गृहीतवान् – ग्रह् + क्तवतु। त्वत्त: – त्वत् + तसिल्।

**प्रश्ना: (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) आश्वस्त: क: अस्ति? (*ii*) द्वारकापुरीम् क: आगच्छत्?

**(II) पूर्णवाक्येन उत्तरत–**

द्रोणपुत्र: किं कर्तुं समर्थ: न अभवत्?

**(III) भाषिककार्यम्–**

(*i*) 'पाणिना' अस्य पदस्य विशेषणपदं किम्?

(क) वामेन (ख) दक्षिणेन (ग) सव्येन (घ) रक्षेण

(*ii*) 'दा' योगे अत्र का विभक्ति: प्रयुक्ता?

(क) चतुर्थी (ख) तृतीया (ग) पञ्चमी (घ) षष्ठी

(*iii*) 'तुभ्यम् ददामि'। अत्र 'तुभ्यम्' पदं कस्मै प्रयुक्तम्?

(क) द्रौणिने (ख) श्रीकृष्णाय (ग) युधिष्ठिराय (घ) अर्जुनाय

(*iv*) 'सव्येन पाणिना' इति अत्र विशेष्यपदं किम्?

(क) सव्येन (ख) पाणिना (ग) पाणि: (घ) सव्य:

(*v*) 'अधुना' इति अर्थे किं पदं प्रयुक्तम्?

(क) अद्य (ख) साम्प्रतम् (ग) सम्पत्ति: (घ) सम्प्रति

(*vi*) 'अवाञ्छत्' इति क्रियाया: कर्तृपदं किम्?

(क) क: (ख) दत्वा (ग) सुदर्शनचक्रम् (घ) स:

**उत्तराणि–** (I) (*i*) युधिष्ठिर: (*ii*) स:/द्रोणपुत्र:।

(II) द्रोणपुत्र: चक्रं स्वस्थानात् संचालयितुम् समर्थ: न अभवत्।

(III) (*i*) (ग) सव्येन (*ii*) (क) चतुर्थी (*iii*) (क) द्रौणिने (*iv*) (ख) पाणिना (*v*) (घ) सम्प्रति (*vi*) (घ) स:।

**प्रश्ननिर्माणम्–** (*i*) स: तु **चक्रम्** एव अयाचत।

(*ii*) **स:** सव्येन पाणिनां चक्रंगृहीतवान्।

(*iii*) स **ब्रह्मास्त्र-प्रयोगं** न करिष्यति।

(*iv*) नाहं **त्वत्त:** ब्रह्मास्त्रम् वाञ्छामि।

**उत्तराणि–**(*i*) किम् (*ii*) क: (*iii*) किम् (*iv*) कस्मात्।

## ( 5 )

***युधिष्ठिर:*** *जानीम: भवत: दिव्यां शक्तिम्।*

***श्रीकृष्ण:*** *तदा अहं नैराश्येन खिन्नं द्रौणिं पृष्टवान्, 'वत्स! किमर्थं त्वम् इदं दिव्यं चक्रं वाञ्छसि?*

***युधिष्ठिर:*** *किम् उक्तं तेन?*

***श्रीकृष्ण:*** *स: प्रत्यवदत्–*

***प्रार्थितं ते मया चक्रं देवदानवपूजितम्।***
***अजेय: स्यामिति विभो! सत्यमेतद् ब्रवीमि ते॥2॥***

*अतोऽहं ब्रवीमि, तस्मिन् चञ्चले क्रूरे च द्रोणपुत्रे न विश्वसितव्यम्।*

## हिंदी अनुवाद (Hindi Translation)

**श्रीकृष्ण** आपकी दिव्य शक्ति को जानता हूँ।
**अर्जुन** तब मैंने निराशा से खिन्न अश्वत्थामा से पूछा, वत्स! तुम यह दिव्य चक्र किसलिए चाहते हो?
**युधिष्ठिर** उसने क्या कहा?
**श्रीकृष्ण** उसने उत्तर दिया–हे भगवन्! मैं अजेय हो जाऊँ, इसीलिए मैंने देवताओं और दानवों द्वारा पूजित चक्र आपसे माँगा है। यह आपसे सच बोल रहा हूँ।
इसीलिए मैं बोलता हूँ, उस चंचल और निर्दयी द्रोणपुत्र पर विश्वास नहीं करना चाहिए।

## अन्वय: (Prose-order)

**प्रार्थितं ते मया चक्रं देवदानवपूजितम्।**
**अजेय: स्यामिति विभो! सत्यमेतद् ब्रवीमि ते॥2॥**

विभो! (*i*) .................... स्याम् इति (*ii*) .................... देवदानव-पूजितम् (*iii*) .................... ते प्रार्थितम्। एतत् ते (*iv*) .................... ब्रवीमि।

**मञ्जूषा–** मया, सत्यम्, अजेय:, चक्रम्

**उत्तराणि–**(*i*) अजेय: (*ii*) मया (*iii*) चक्रम् (*iv*) सत्यम्।

## शब्दार्था: (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**खिन्नं**–निराशम्, दु:खी (Sad)। **क्रूरे**–दयाहीने, निर्दयी (On the unkind/cruel)। **विभो**–हे व्यापक! हे शक्तिमान् (O! all pervading Lord, O! omnipresent)।

## संस्कृते भावार्थ: (Summary)

**प्रार्थितं ते मया चक्रं देवदानवपूजितम्।**
**अजेय: स्यामिति विभो! सत्यमेतद् ब्रवीमि ते॥2॥**

**अस्य भावोऽस्ति यत्**–द्रोणपुत्र: (*i*) .................... अवदत्–हे सर्वव्यापक! (विभो!) अहम् अस्मिन् संसारे (*ii*) .................... स्याम् अत: अहम् त्वाम् देवदानवपूजितम् इदम् (*iii*) .................... प्रार्थितवान्। अहम् त्वाम् एतत् (*iv*) .................... वदामि।

**मञ्जूषा–** सत्यं, चक्रं, श्रीकृष्णम्, अजेय:

**उत्तराणि–**(*i*) श्रीकृष्णम् (*ii*) अजेय: (*iii*) चक्रं (*iv*) सत्यं।

## समासा: (Compounds)

दिव्यां शक्तिम् – दिव्यशक्तिम् (कर्मधारय:)।
अजेय: – न जेय: (नञ् तत्पुरुष:)।
देवदानवपूजितम् – देवै: दानवै: च पूजितम् (तृतीया तत्पुरुष:)।
दिव्यं चक्रम् – दिव्यचक्रम् (कर्मधारय:)।

## सन्धि-विच्छेद: (Disjoin Sandhi)

दिव्यां शक्तिम् – दिव्याम् + शक्तिम् (अनुस्वार सन्धि:)। प्रत्यवदत् – प्रति + अवदत् (यण् सन्धि:)।
अतोऽहम् – अत: + अहम् (विसर्ग सन्धि:)। चञ्चले – चम + चले (परसवर्ण सन्धि:)।

## प्रत्यया: (Suffixes)

उक्तम् – वच् + क्त। पूजितम् – पूज् + क्त। पृष्टवान् – पृष् + क्तवतु।
विश्वसितव्यम् – वि + श्वस् + तव्यत्। प्रार्थितम् – प्र + अर्थ् + क्त।

**प्रश्ना: (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) कः कृष्णस्य शक्तिम् जानाति? (*ii*) 'स्यामिति' अत्र सन्धिः वर्णसंयोगो वा?

(*iii*) चञ्चलः क्रूरः च कः आसीत्?

**(II) पूर्णवाक्येन उत्तरत–**

(*i*) श्रीकृष्णः द्रोणपुत्रम् किम् प्रश्नम् पृच्छति? (*ii*) चक्रं कैः पूजितम् अस्ति?

**(III) भाषिककार्यम्–**

(*i*) 'चञ्चले' कस्य पदस्य विशेषणम्?

(क) श्रीकृष्णस्य (ख) भीमस्य (ग) द्रोणपुत्रस्य (घ) युधिष्ठिरस्य

(*ii*) 'दिव्याम् शक्तिम्, इति अत्र विशेषणपदं किम्?

(क) दिव्याम् (ख) शक्तिः (ग) शक्तिम् (घ) दिव्या

(*iii*) 'विश्वसितव्यम्' इति पदे का मूलधातुः?

(क) विश्वस् (ख) श्वस् (ग) वि (घ) तव्यम्

(*iv*) 'स्याम्' इति पदं कस्मिन् लकारे?

(क) लङ् (ख) लोट् (ग) लट् (घ) विधिलिङ्

**उत्तराणि–** (I) (*i*) युधिष्ठिरः (*ii*) वर्णसंयोगः (*iii*) द्रोणपुत्रः।

(II) (*i*) 'वत्स! किमर्थं त्वम् इदं दिव्यं चक्रं वाञ्छसि?' (*ii*) चक्रं देवदानवैः पूजितम् अस्ति।

(III) (*i*) (ग) द्रोणपुत्रस्य (*ii*) (क) दिव्याम् (*iii*) (ख) श्वस् (*iv*) (घ) विधिलिङ्।

**प्रश्ननिर्माणम्–** (*i*) भवतः **दिव्यां** शक्तिं जानीमः।

(*ii*) **अहं** खिन्नं द्रौणिं पृष्टवान्।

(*iii*) तस्मिन् **क्रूरे** द्रोणपुत्रे न विश्वसितव्यम्।

(*iv*) एतत् **ते** सत्यं ब्रवीमि।

**उत्तराणि–**(*i*) कीदृशीम् (*ii*) कः (*iii*) कीदृशे (*iv*) कम्।

**(6)**

*(ततः युधिष्ठिरार्जुनौ श्रीकृष्णेन सह रथारोहणं नाटयतः।)*

***अश्वत्थामा*** *रे दुष्ट भीम! त्वम् अद्य वध्योऽसि मया। (विलोक्य) अये कथं श्रीकृष्णार्जुनौ युधिष्ठिरश्च? (स्वगतम्) इदानीं किं करवाणि? आः, दृष्टम्, अस्मिन् विषमे समये ब्रह्मास्त्रम् एव मे शरणम्। मोचयामि अस्त्रम्। (ध्यानं नाटयति ब्रवीति च) इदम् अपाण्डवाय।*

***श्रीकृष्णः*** *पार्थ पश्य, पश्य। एतद् विमुच्यते ब्रह्मास्त्रं द्रोणपुत्रेण! त्रैलोक्यं दहन् इव प्रचण्डज्वालः अग्निः परितः प्रसरति। अर्जुन! अर्जुन! त्वमपि मुञ्च ब्रह्मास्त्रं एतत् निवारयितुम्।*

**हिंदी अनुवाद (Hindi Translation)**

**(तब युधिष्ठिर और अर्जुन श्रीकृष्ण के साथ रथ पर चढ़ने का अभिनय करते हैं।)**

**अश्वत्थामा** रे दुष्ट भीम! तुम आज मेरे द्वारा मार दिए जाओगे। (देखकर) अरे क्या श्रीकृष्ण, अर्जुन और युधिष्ठिर? (मन में) अब क्या करूँ? अहा सोच लिया (देख लिया), इस विषम समय में ब्रह्मास्त्र ही मेरी शरण है। अस्त्र छोड़ रहा हूँ। (ध्यान लगाने का अभिनय करता है और बोलता है) यह पाण्डवों के विनाश के लिए हो।

**श्रीकृष्ण** पार्थ देखो, देखो, द्रोणपुत्र के द्वारा यह ब्रह्मास्त्र छोड़ा जा रहा है। तीनों लोकों को जलाती हुई-सी तेज लपटों वाली आग चारों तरफ फैल रही है। अर्जुन! तुम भी इसे रोकने के लिए (निवारण-हेतु) ब्रह्मास्त्र छोड़ो।

**शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)**

**विलोक्य**–दृष्ट्वा, देखकर (After seeing)। **स्वगतम्**–मनसि, मन में (In the mind)। **पार्थ**–अर्जुन, अर्जुन (Arjuna)।

**समासाः (Compounds)**

रथारोहणम् – रथे (रथस्य) आरोहणम् (सप्तमी तत्पुरुषः)। युधिष्ठिरार्जुनौ – युधिष्ठिरः च अर्जुनः च (द्वन्द्वः)।
अपाण्डवाय – न पाण्डवाय (नञ् तत्पुरुषः)। प्रचण्डज्वालः – प्रचण्डाः ज्वलाः यस्य सः (बहुव्रीहिः)।

**सन्धि-विच्छेदः (Disjoin Sandhi)**

वध्योऽसि – वध्यः + असि (विसर्ग सन्धिः) रथारोहणम् – रथ + आरोहणम् (दीर्घ सन्धिः)।

**प्रत्ययाः (Suffixes)**

वध्यः – वध् + यत्। निवारयितुम् – नि + वृ + णिच् + तुमुन्। विलोक्य – वि + लोक् + ल्यप्।
दहन – दह् + शतृ। दृष्टम् – दृश् + क्त।

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) केन ब्रह्मास्त्रम् विमुच्यते? (*ii*) श्रीकृष्णेन सह कौ प्रविशतः?

**(II) पूर्णवाक्येन उत्तरत–**

(*i*) अश्वत्थामा किम् ब्रवीति? (*ii*) कीदृशः अग्निः प्रसरति?

**(III) भाषिककार्यम्–**

(*i*) 'विषमे समये' अत्र विशेषणपदम् किम्?
(क) विषमे (ख) विषमं (ग) समयः (घ) समये

(*ii*) 'परितः' योगे का विभक्तिः भवति?
(क) प्रथमा (ख) तृतीया (ग) द्वितीया (घ) चतुर्थी

(*iii*) 'मे शरणम्' अत्र 'मे' पदं कस्मै प्रयुक्तम्?
(क) अर्जुनाय (ख) अश्वत्थामाय (ग) भीमाय (घ) श्रीकृष्णाय

(*iv*) 'करवाणि' इति पदं कस्मिन् लकारे?
(क) लट् (ख) लङ् (ग) विधिलिङ् (घ) लोट्

**उत्तराणि–** (I) (*i*) द्रोणपुत्रेण (*ii*) युधिष्ठिरार्जुनौ।
(II) (*i*) अश्वत्थामा ब्रवीति–इदम् अपाण्डवाय। (*ii*) त्रैलोक्यम् दहन् इव प्रचण्डज्वालः अग्निः परितः प्रसरति।
(III) (*i*) (क) विषमे (*ii*) (ग) द्वितीया (*iii*) (ख) अश्वत्थामाय (*iv*) (घ) लोट्।

**प्रश्ननिर्माणम्–** (*i*) **मया** त्वमद्य वध्योऽसि।
(*ii*) अर्जुन! त्वमपि **ब्रह्मास्त्रं** मुञ्च।
(*iii*) एतत् **द्रोणपुत्रेण** ब्रह्मास्त्रं विमुच्यते।
(*iv*) श्रीकृष्णेन सह **युधिष्ठिरार्जुनौ** रथारोहणं कुरुतः।

**उत्तराणि–**(*i*) केन (*ii*) किम् (*iii*) केन (*iv*) कौ।

**(7)**

**अर्जुनः** *नमः भगवते। स्वस्ति आचार्यपुत्राय। स्वस्ति मे भ्रातृभ्यः। उत्सृज्यते मया ब्रह्मास्त्रम्। अस्त्रम् अस्त्रेण शाम्यताम्।*

*(ततः प्रविशतः व्यासनारदौ)*

**नारदः** *(व्यासं प्रति) पश्यतु भवान्। कोऽयम् अनर्थः क्रियते एताभ्यां वीराभ्याम्। समन्तात् वर्धमानाः प्रचण्डानलशिखाः आकाशं लिहन्ति इव। गगनात् सहस्रशः उल्काः भूमौ पतन्ति। कम्पते खलु*

*सपर्वत-वन-द्रुमा सकला मही। पवनः स्तब्धः जातः। सहस्रांशुः न भासते। शैलाः विदीर्यन्ते। कथमपि एतौ निवारणीयौ, अन्यथा सकलं जगद् ध्वस्तं भविष्यति।*

**व्यासनारदौ** *भो वीरौ! संहरतम् संहरतम् निजास्त्रे।*

**नारद** *नानाशस्त्रविदः पूर्वे येऽप्यतीता महारथाः।*
*नैतदस्त्रं मनुष्येषु तैः प्रयुक्तं कथञ्चन॥3॥*
*अस्त्रं ब्रह्मशिरो यत्र परमास्त्रेण वध्यते।*
*समाः द्वादश पर्जन्यस्तद् राष्ट्रं नाभिवर्षति॥4॥*

## हिंदी अनुवाद (Hindi Translation)

**अर्जुन** भगवान को नमस्कार! आचार्यपुत्र का कल्याण हो! मेरे भाइयों का कल्याण हो! मेरे द्वारा ब्रह्मास्त्र छोड़ा जा रहा है। अस्त्र को अस्त्र द्वारा शान्त कर दिया जाए।

**नारद** (व्यास के प्रति) आप देखो। इन दोनों वीरों के द्वारा क्या अनर्थ किया जा रहा है। चारों ओर बढ़ती हुई तेज़ आग की लपटें आकाश को छू रही हैं। आकाश से हज़ारों उल्काएँ भूमि पर गिर रही हैं। सारी पृथ्वी पर्वतों, वनों और पेड़ों सहित काँप रही है। हवा स्तब्ध हो गई है। सूर्य नहीं चमक रहा है। पर्वत फट रहे हैं। किसी तरह इन दोनों को रोकना चाहिए, नहीं तो सारा संसार ध्वस्त हो जाएगा।

**व्यास और नारद** हे दोनों वीरो! अपने अस्त्र रोक लो, रोक लो।

**नारद** पूर्व काल में जो भी अनेक अस्त्र के ज्ञाता महारथी हुए हैं उनके द्वारा यह अस्त्र मनुष्यों पर किसी प्रकार भी प्रयोग नहीं किया गया। जहाँ ब्रह्मास्त्र को दूसरे महान अस्त्र से नष्ट किया जाता है। उस देश में बादल बारह साल तक नहीं बरसता।

## अन्वयः (Prose-order)

**नानाशस्त्रविदः पूर्वे येऽप्यतीता महारथाः।**
**नैतदस्त्रं मनुष्येषु तैः प्रयुक्तं कथञ्चन॥3॥**

नाना (*i*) .................... ये अपि पूर्वे (*ii*) .................... अतीताः, तैः एतद् (*iii*) .................... मनुष्येषु (*iv*) .................... न प्रयुक्तम्॥3॥

**मञ्जूषा–** महारथाः, अस्त्रम्, शस्त्रविदः, कथञ्चन।

**उत्तराणि–**(*i*) शस्त्रविदः (*ii*) महारथाः (*iii*) अस्त्रम् (*iv*) कथञ्चन।

**अस्त्रं ब्रह्मशिरो यत्र परमास्त्रेण वध्यते।**
**समाः द्वादश पर्जन्यस्तद् राष्ट्रं नाभिवर्षति॥4॥**

(*i*) .................... ब्रह्मशिरः अस्त्रं (*ii*) .................... वध्यते, (*iii*) .................... द्वादशसमाः तद् (*iv*) .................... न अभिवर्षति॥4॥

**मञ्जूषा–** राष्ट्रम्, यत्र, पर्जन्यः, परमास्त्रेण।

**उत्तराणि–**(*i*) यत्र (*ii*) परमास्त्रेण (*iii*) पर्जन्यः (*iv*) राष्ट्रम्।

## शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**स्वस्ति**–कल्याणम् अस्तु, कल्याण हो (To be best)। **समन्तात्**–सर्वतः, चारों ओर से (From all sides)। **सकला**–समस्ता, सारी (Full)। **मही**–भू, पृथ्वी (Earth)। **सहस्रांशुः**–भास्करः, सूर्य (Sun)। **संहरतम्**–विनाश्यतम्, समेट लो (Withdraw)।

## संस्कृते भावार्थः (Summary)

**नानाशस्त्रविदः पूर्वे येऽप्यतीता महारथाः।**
**नैतदस्त्रं मनुष्येषु तैः प्रयुक्तं कथञ्चन॥3॥**

**अस्य भावोऽस्ति यत्**–नारदः (*i*) ………………… अर्जुनम् च कथयति यत् हे वीरौ युवाम् (*ii*) ………………… संहरतम् यतोहि पूर्वे ये अपि (*iii*) ………………… महावीराः अभवन् तेऽपि कदापि एतत् अस्त्रम् (*iv*) ………………… न प्रयुक्तवन्तः॥3॥

**मञ्जूषा**– | निजास्त्रे, नानाशस्त्रज्ञातारः, मनुष्येषु, द्रोणपुत्रम्। |

**उत्तराणि**–(*i*) द्रोणपुत्रम् (*ii*) निजास्त्रे (*iii*) नानाशस्त्रज्ञातारः (*iv*) मनुष्येषु।

**अस्त्रं ब्रह्मशिरो यत्र परमास्त्रेण वध्यते।**
**समाः द्वादश पर्जन्यस्तद् राष्ट्रं नाभिवर्षति॥4॥**

अर्थात्–यत्र (*i*) ………………… नाम अस्त्रं परमास्त्रेण नश्यते (*ii*) ………………… राष्ट्रे मेघाः द्वादश वर्षाणि न (*iii*) …………………। अर्थात् अस्य अस्त्रस्य प्रयोगेण तु (*iv*) ………………… विनश्यति।

**मञ्जूषा**– | जीवनमेव, ब्रह्मशिरः, तस्मिन्, अभिवर्षन्ति |

**उत्तराणि**–(*i*) ब्रह्मशिरः (*ii*) तस्मिन् (*iii*) अभिवर्षन्ति (*iv*) जीवनमेव।

## समासाः (Compounds)

प्रचण्डानलशिखाः – प्रचण्डस्य अनलस्य शिखाः (षष्ठी तत्पुरुषः)। परमास्त्रेण – परमेण अस्त्रेण (कर्मधारयः)।
व्यासनारदौ – व्यासः च नारदः च (द्वन्द्वः)। सपर्वत – पर्वतेण सह (अव्ययीभावः)।
सहस्रांशुः – सहस्रशः अंशवः यस्य सः (बहुव्रीहिः)।

## सन्धि-विच्छेदः (Disjoin Sandhi)

कोऽयम् – कः + अयम् (विसर्गसन्धिः)। प्रचण्डानल– प्रचण्ड + अनल (दीर्घसन्धिः)।
कथञ्चन – कथम् + चन (परसवर्ण सन्धिः)। नैतदस्त्रम – न + एतत् (वृद्धिसन्धिः) + अस्त्रम् (जश् सन्धिः)।
नाभिवर्षति – न + अभिवर्षति (दीर्घसन्धिः)। येऽप्यतीता – ये + अपि (पूर्व रूप) + अतीता (यण्सन्धिः)।
पर्जन्यस्तद् – पर्जन्यः + तद् (विसर्गसन्धिः)। परमास्त्रेण – परम + अस्त्रेण (दीर्घसन्धिः)।

## प्रत्ययाः (Suffixes)

वर्धमानाः – वृध् + शानच्। निवारणीयौ – नि + वृञ् + अनीयर्। प्रयुक्तम् – प्र + युज् + क्त।

## प्रश्नाः (Questions)

**(I) एकपदेन उत्तरत–**

(*i*) अत्र नाट्यांशे नारदः कति श्लोकौ पठति?
(*ii*) 'पृथ्वी' इत्यर्थे नाट्यांशे किं पदं प्रयुक्तम्?

**(II) पूर्णवाक्येन उत्तरत–**

(*i*) अर्जुनः कस्मै नमस्करोति?
(*ii*) अनर्थः काभ्याम् क्रियते?

**(III) भाषिककार्यम्–**

(*i*) 'जगद्' इत्यस्य पदस्य विशेषणपदम् किम्?
(क) समस्तम् (ख) सकलम् (ग) सम्पूर्णम् (घ) सरलम्
(*ii*) 'वर्धमाना' इति पदे कः प्रत्ययः?
(क) शतृ (ख) शतृ + टाप् (ग) शानच् (घ) शानच् + टाप्
(*iii*) 'कम्पते' इति क्रियायाः कर्तृपदं किम्?
(क) मही (ख) जगत् (ग) पर्वतः (घ) पृथ्वी
(*iv*) 'भवान्' इति पदस्य प्रयोगः कस्मै अभवत्?
(क) नारदाय (ख) अर्जुनाय (ग) व्यासाय (घ) कृष्णाय

**उत्तराणि**– (I) (*i*) द्वौ (*ii*) मही।
(II) (*i*) अर्जुनः भगवते कृष्णाय नमस्करोति। (*ii*) अनर्थः अर्जुनेन द्रोणपुत्रेण च क्रियते।
(III) (*i*) (ख) सकलम् (*ii*) (घ) शानच् + टाप् (*iii*) (क) मही (*iv*) (ग) व्यासाय।

**प्रश्ननिर्माणम्**– (*i*) उत्सृज्यते **मया** ब्रह्मास्त्रम्।
(*ii*) सकला **मही** कम्पते।
(*iii*) एताभ्यां वीराभ्याम् **अनर्थः** क्रियते।
(*iv*) **नानाशास्त्रविदः** महारथाः अपि मनुष्येषु इदमस्त्रं न प्रयुक्तवन्तः।

**उत्तराणि**–(*i*) केन (*ii*) का (*iii*) कः (*iv*) कीदृशाः।

## (8)

***अर्जुनः*** *(बद्धाञ्जलिः भूत्वा) भगवन्! मया तु अस्त्रम् अस्त्रेण शाम्यताम् इति कृत्वा अस्त्रं विमुक्तम्। तत् च मया संह्रियते। परन्तु द्रौणेः अस्त्रम् अस्मान् सर्वान् प्रधक्ष्यति एव।*
***व्यासः*** *(द्रौणिं प्रति) अयि द्रोणपुत्र! त्वम् अपि निज-अस्त्रं संहर येन सर्वनाशो न भवेत्।*

***पाण्डवास्त्वं च राष्ट्रं च सदा संरक्ष्यमेव हि।***
***तस्मात् संहर दिव्यं त्वमस्त्रमेतमहाभुज॥5॥***

## हिंदी अनुवाद (Hindi Translation)

**अर्जुन** (हाथ जोड़कर) भगवन्! मैंने तो अस्त्र से अस्त्र शांत हो जाए यह करके अस्त्र छोड़ा था। वह तो मेरे द्वारा रोक लिया जाएगा। किन्तु अश्वत्थामा का अस्त्र तो हम सभी को जला ही देगा।

**व्यास** (अश्वत्थामा के प्रति) हे द्रोणपुत्र! तुम भी अपना अस्त्र लौटा लो जिससे सर्वनाश न हो। पाण्डवों को और तुम्हें सदैव राष्ट्र की रक्षा करनी चाहिए। इसलिए हे विशाल भुजाओं वाले! तुम यह अस्त्र लौटा लो।

**अन्वयः (Prose-order)**

**पाण्डवास्त्वं च राष्ट्रं च सदा संरक्ष्यमेव हि।**
**तस्मात् संहर दिव्यं त्वमस्त्रमेतमहाभुज॥5॥**

पाण्डवाः (*i*) ........................ च राष्ट्रम् च सदा (*ii*) ........................ एव हि, महाभुज! (*iii*) ........................ त्वम् एतत् (*iv*) ........................ अस्त्रम् संहर।

**मञ्जूषा–** संरक्ष्यम्, दिव्यम्, लाभ, तस्मात्

**उत्तराणि–**(*i*) त्वम् (*ii*) संरक्ष्यम् (*iii*) तस्मात् (*iv*) दिव्यम्।

**शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)**

**प्रधक्ष्यति–**दग्धं करिष्यति, जला देगा (Will burn)। **निज–**स्व, अपना (Your own)। **संहर–**संहारं कुरु, लौटा लो (Withdraw)।

**संस्कृते भावार्थः (Summary)**

**पाण्डवास्त्वं च राष्ट्रं च सदा संरक्ष्यमेव हि।**
**तस्मात् संहर दिव्यं त्वमस्त्रमेतमहाभुज॥5॥**

व्यासमुनिः (*i*) ........................ आश्वस्तम् कुर्वन् वदति यत् हे द्रोणपुत्र! (*ii*) ........................ त्वम् च एतत् राष्ट्रम् च सदा एव संरक्ष्याः (*iii*) ........................। अतएव हे महाभुज! त्वम् एतत् (*iv*) ........................ अस्त्रं ब्रह्मास्त्रं संहर। येन सर्वनाशः न भवेत्।

**मञ्जूषा–** दिव्यम्, द्रोणपुत्रम्, पाण्डवाः, सन्ति

**उत्तराणि–**(*i*) द्रोणपुत्रम् (*ii*) पाण्डवाः (*iii*) सन्ति (*iv*) दिव्यम्।

**समासाः (Compounds)**

बद्धाञ्जलिः – बद्धा अञ्जलिः यस्य सः (बहुव्रीहिः)। महाभुज – महान्तौ भुजौ यस्य सः (बहुव्रीहिः)।
सर्वनाशः – सर्वेषाम् नाशः (षष्ठी तत्पुरुषः)।

**सन्धि-विच्छेदः (Disjoin Sandhi)**

बद्धाञ्जलिः – बद्ध + अञ्जलिः (दीर्घ सन्धिः)। पाण्डवास्त्वम् – पाण्डवाः + त्वम् (विसर्ग सन्धिः)।
त्वमस्त्रमेतन्महाभुज – त्वम् + अस्त्रम् + एतत् (संयोगः) + महाभुज (अनुस्वार सन्धिः)।

**प्रत्ययाः (Suffixes)**

विमुक्तम् – वि + मुच् + क्त। कृत्वा – कृ + क्त्वा। संरक्ष्यम् – सम् + रक्ष् + यत्।

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**

अत्र किम् सम्बोधनपदम्?

**(II) पूर्णवाक्येन उत्तरत–**

(*i*) द्रौणेः अस्त्रम् किम् करिष्यति? (*ii*) अर्जुनः किम् उक्त्वा अस्त्रम् उत्सृजति?

**(III) भाषिककार्यम्–**

(*i*) 'भगवन्' पदे कः प्रत्ययः?
(क) वतुप् (ख) वान् (ग) मतुप् (घ) मत्

(*ii*) अत्र 'मया' पदम् कस्मै प्रयुक्तम्?
(क) अर्जुनाय (ख) द्रौणिने (ग) श्रीकृष्णाय (घ) युधिष्ठिराय

(*iii*) 'दिव्यं' पदं कस्य विशेषणम्?
(क) भीमस्य (ख) अर्जुनस्य (ग) शक्तेः (घ) अस्त्रस्य

(*iv*) 'भवेत्' इति क्रियायाः कर्तृपदं किम्?
(क) नाशः (ख) सर्वनाशः (ग) येन (घ) संहर

**उत्तराणि–** (I) (*i*) भगवन्!

(II) (*i*) द्रौणेः अस्त्रम् अस्मान् सर्वान् प्रधक्ष्यति एव। (*ii*) 'अस्त्रम् अस्त्रेण शाम्यताम्' इति उक्त्वा अर्जुनः अस्त्रम् उत्सृजति।

(III) (*i*) (ग) मतुप् (*ii*) (क) अर्जुनाय (*iii*) (घ) अस्त्रस्य (*iv*) (ख) सर्वनाशः।

**प्रश्ननिर्माणम्–** (*i*) तत् च **मया** संह्रियते। (*ii*) त्वम् एतत् **दिव्यम्** अस्त्रं संहर।
(*iii*) **अस्त्रम्** अस्त्रेण शाम्यताम्। (*iv*) **द्रौणेः** अस्त्रं सर्वान् प्रयक्ष्यति एव।

**उत्तराणि–**(*i*) केन (*ii*) कीदृशम् (*iii*) किम् (*iv*) कस्य।

## पाठ्यपुस्तकस्य अभ्यासः
## (अनुप्रयोगः)

**1. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन देयानि–(मौखिक-अभ्यासार्थम्)**

(क) द्रौपद्याः पुत्राः केन हताः?
(ख) वारणावते पाण्डवान् कः अरक्षत्?
(ग) नकुलः कस्य सारथिः अभवत्?

(घ) आपद्गतेन अपि ब्रह्मास्त्रं केषु न प्रयोक्तव्यम्?

(ङ) अश्वत्थामा श्रीकृष्णं किम् अयाचत?

(च) आकाशात् काः पतन्ति स्म?

(छ) कः न भासते स्म?

**उत्तराणि**– (क) द्रोणपुत्रेण। (ख) भीमः। (ग) भीमस्य। (घ) मानुषेषु
(ङ) चक्रम् (च) उल्काः (छ) सूर्यः।

**2. पूर्णवाक्येन उत्तरं दीयताम्।**

(क) द्रोणाचार्यः प्रीतः भूत्वा कं ब्रह्मास्त्रम् अशिक्षयत्?

(ख) अश्वत्थामा केषां विनाशाय ब्रह्मास्त्रम् मोचयति?

(ग) भीमसेनः नकुलेन सह कम् अनुगच्छति?

(घ) द्रोणपुत्रः श्रीकृष्णात् किं वाञ्छति स्म?

(ङ) अस्त्रं संहरतम्-इति कौ वदतः?

(च) ब्रह्मास्त्रस्य निषेधेन के के संरक्ष्याः सन्ति?

**उत्तराणि**– (क) द्रोणाचार्यः प्रीतः भूत्वा द्रौणिम् (निजपुत्रम्) ब्रह्मास्त्रम् अशिक्षयत्।
(ख) अश्वत्थामा पाण्डवानां विनाशाय ब्रह्मास्त्रम् मोचयति।
(ग) भीमसेनः नकुलेन सह द्रोणपुत्रम् अनुगच्छति।
(घ) द्रोणपुत्रः श्रीकृष्णात् चक्रम् वाञ्छति स्म।
(ङ) अस्त्रं संहस्त्रम्–इति नारदव्यासौ वदतः।
(च) ब्रह्मास्त्रस्य निषेधेन पाण्डवाः, द्रौणिः राष्ट्रं च संरक्ष्याः सन्ति।

**3. कः कम् कथयति?**

| | कः | कम् |
|---|---|---|
| **यथा–कथं मन्दभाग्या अहं धैर्यं धारयामि?** | **द्रौपदी** | **युधिष्ठिरम्** |
| (क) वारणावते त्वम् एव पाण्डवान् रक्षितवान्। | ............................ | ............................ |
| (ख) मह्यम् अनुमतिं ददातु भवान्। | ............................ | ............................ |
| (ग) नकुलः तव सारथिः भवतु। | ............................ | ............................ |
| (घ) सः तु एकाकी एव द्रोणपुत्राय, अलम्। | ............................ | ............................ |
| (ङ) न जानासि तस्य मनोवृत्तिम्। | ............................ | ............................ |
| (च) जानीमः भवतः दिव्यां शक्तिम्। | ............................ | ............................ |
| (छ) अये कथं श्रीकृष्णार्जुनौ युधिष्ठिरश्च? | ............................ | ............................ |
| (ज) हे वीरौ! संहरतम् संहरतम् निजास्त्रे। | ............................ | ............................ |

**उत्तराणि**–

| | |
|---|---|
| (क) द्रौपदी | भीमम् |
| (ख) भीमः | युधिष्ठिरम् |
| (ग) युधिष्ठिरः | भीमम् |
| (घ) युधिष्ठिरः | श्रीकृष्णम् |
| (ङ) श्रीकृष्णः | युधिष्ठिरम् |
| (च) युधिष्ठिरः | श्रीकृष्णम् |
| (छ) द्रोणपुत्रः | आत्मानम् |
| (ज) नारदव्यासौ | अर्जुनं द्रोणपुत्रं च। |

**4. श्लोकान् पठित्वा अधोलिखितवाक्यानि पूरयत–**

**परमापद्गतेनापि नैव तात त्वया रणे।**
**इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः॥**

**यथा**–तात! परमापद्गतेन अपि त्वया रणे इदम् अस्त्रम् विशेषतः मनुषेषु न एव प्रयोक्तव्यम्।

(क) प्रार्थितं ते मया चक्रं देवदानवपूजितम्।
अजेयः स्यामिति विभो! सत्यमेतद् ब्रवीमि ते।।
विभो! अजेयः स्याम् इति मया देवदानवपूजितम् चक्रम् ते प्रार्थितम्।
..........................................................................................

(ख) नानाशस्त्रविदः पूर्वे येऽप्यतीता महारथा।
नैतदस्त्रं मनुष्येषु तैः प्रयुक्तं कथञ्चन।।
नाना शस्त्रविदः ये अपि पूर्वे महारथाः अतीताः
तैः ..........................................................................................

(ग) पाण्डवास्त्वं च राष्ट्रं च सदा संरक्ष्यमेव हि।
तस्मात् संहर दिव्यं त्वमस्त्रमेतन्महाभुज!।।
पाण्डवाः त्वं च राष्ट्रं च सदा संरक्ष्यम्
..........................................................................................

**उत्तराणि**–(क) ते एतत् सत्यम् ब्रवीमि।
(ख) एतत् अस्त्रं मनुष्येषु कथञ्चन न प्रयुक्तम्।
(ग) महाभुज! तस्मात् त्वम् एतत् दिव्यम् अस्त्रम् संहर।

**5. अधोलिखितवाक्येषु स्थूलपदानि कस्मै प्रयुक्तानि।**

| | **उत्तरम्** |
|---|---|
| **यथा**–अग्निः इव दहति माम् अयं शोकः। | द्रौपद्यै |
| (क) कश्चित् अपि **त्वया** सदृशः पराक्रमी नास्ति। | .................................... |
| (ख) ब्रह्मशिरो नाम अस्त्रं विद्यते **तस्य** पार्श्वे। | .................................... |
| (ग) **इदम्** अपाण्डवाय। | .................................... |
| (घ) नैतदस्त्रं मनुष्येषु **तैः** प्रयुक्तं कथञ्चन। | .................................... |

**उत्तराणि**–(क) भीमाय। (ख) द्रोणपुत्राय। (ग) अस्त्राय। (घ) पूर्व-महारथिभ्यः।

**6. कर्मवाच्यात् कर्तृवाच्ये परिवर्तनं कुरुत–**

| **कर्मवाच्यम्** | **कर्तृवाच्यम्** |
|---|---|
| **यथा**–त्वया असौ पापी न **दण्ड्यते**। | त्वम् अमुं पापिनं न दण्डयसि। |
| (क) मया अस्त्रं तुभ्यं **दीयते**। | .............................................. |
| (ख) त्वया तस्य **मनोवृत्तिः न** ज्ञायते। | .............................................. |
| (ग) अस्माभिः भवतः **शक्तिः** ज्ञायते। | .............................................. |
| (घ) मया इदम् अस्त्रम् उत्सृज्यते। | .............................................. |
| (ङ) सहस्रांशुः न भास्यते। | .............................................. |
| (च) मया द्रोणपुत्रः अनुगम्यते। | .............................................. |

**उत्तराणि**–(क) अहम् अस्त्रं तुभ्यम् ददामि। (ख) त्वं तस्य मनोवृत्तिं न जानासि। (ग) वयम् भवतः शक्तिं जानीमः। (घ) अहम् इदम् अस्त्रम् उत्सृजामि। (ङ) सहस्रांशुः न भासते। (च) अहं द्रोणपुत्रम् अनुगच्छामि।

**7. विशेषणानां विशेष्यैः सह मेलनं क्रियताम्–**

| **विशेषणानि** | **विशेष्याणि** |
|---|---|
| (क) सव्येन | चक्रम् |
| (ख) पापकर्मणा | समये |

(ग) देवदानवपूजितम् — उल्काः
(घ) सकला — द्रौणिना
(ङ) सहस्रशः — पाणिना
(च) विषमे — मही

**उत्तराणि–** (क) पाणिना। (ख) द्रौणिना। (ग) चक्रम्।
(घ) मही। (ङ) उल्काः। (च) समये।

**8. अधोलिखितेषु पदेषु यत् पदम् अर्थदृष्ट्या भिन्नं तं रेखाङ्कितं कुरुत–**

**यथा**–पर्जन्यः, पयोदः, वारिधरः, <u>पयोधिः</u>।

(क) सहस्रांशुः, हिमांशुः, दिनकरः, भानुः।
(ख) वृक्षाः, द्रुमाः, महीधराः, महीरुहाः।
(ग) पवनः, अनिलः, अनलः, वायुः।
(घ) शैलाः, भूधराः, खेचराः, पर्वताः।
(ङ) नरः, मनुष्यः, पन्नगः, मानवः।

**उत्तराणि–** (क) हिमांशुः, (ख) महीधराः, (ग) अनलः, (घ) खेचराः, (ङ) पन्नगः।

**9. अधोलिखितवाक्यानि पठित्वा स्थूलाक्षरपदम् आधृत्य प्रश्ननिर्माणं कुरुत–**

(*i*) अश्वत्थामा द्वारकां गत्वा **श्रीकृष्णम्** चक्रम् अयाचत। ..........................
(*ii*) पूर्वे **महारथाः** ब्रह्मास्त्रं न प्रयुक्तवन्तः। ..........................
(*iii*) **द्रौपदी** पुत्रशोकेन व्याकुला विलापम् अकरोत्। ..........................

**उत्तराणि–** (*i*) कम्? (*ii*) के? (*iii*) का?

## योग्यता-विस्तारः
## (न परीक्षाकृते)

### कवि परिचयः

महाभारतं महर्षिवेदव्यासस्य कृतिः। महर्षिः कृष्णद्वैपायनो व्यासः त्रिकालज्ञः सर्वशास्त्रार्थतत्त्वज्ञ आसीत्।

**हिंदी अनुवाद (Hindi Translation)**–महाभारत महर्षि वेदव्यास की रचना है। महर्षि कृष्णद्वैपायन व्यास तीनों कालों के ज्ञाता तथा सभी शास्त्रों के मूलतत्त्वार्थ के ज्ञाता थे।

### कवि परिचयः

महाभारतं प्रागैतिहासिकं महाकाव्यम्। अस्मिन् विश्वकोशे न केवलं कौरवपाण्डवानाम् युद्धमेव वर्णितमस्ति अपितु विविधानि पौराणिकानि आख्यानानि, उपदेशप्रदपद्यानि, नीतिसूक्तयः, पुरावृत्तकथा, पशुपक्षिसम्बन्धीनि आख्यानानि, नैतिकं धार्मिकं च विशालं साहित्यं शतसहस्रश्लोकेषु निबद्धं वर्तते। उक्तं हि–यदिहास्ति तदन्यत्र, यन्नेहास्ति न तत् क्वचित्।

**हिंदी अनुवाद (Hindi Translation)–**

महाभारत प्रागैतिहासिक महाकाव्य है। इस विश्वकोश में न केवल कौरवों और पाण्डवों के युद्ध का ही वर्णन है अपितु अनेक पौराणिक आख्यान, उपदेशप्रद श्लोक, नीति-सूक्तियाँ, पुरावृत्तकथा, पशु-पक्षियों से सम्बन्धित आख्यान, नैतिक और धार्मिक विशाल साहित्य हजारों श्लोकों में निबद्ध हैं। कहा गया है–जो कुछ महाभारत में वर्णित है वह अन्यत्र है परन्तु जो यहाँ नहीं है वह अन्यत्र भी नहीं है।

### भावविस्तारः

**(क) भारतीयविज्ञानम्**

1. प्राचीनकाले न केवलम् आणविकास्त्राणां प्रक्षेपणम् अपि च संहरणमपि ज्ञातमासीत्।

2. एतेषां दिव्यास्त्राणां प्रयोगः मनुष्येषु वर्जितः आसीत्।

3. एतेषाम् अस्त्राणां प्रयोगे सति द्वादशवर्षाणि तस्मिन् देशे वृष्टिः न भवत् इत्यपि तैः ज्ञातमासीत्।

**हिंदी अनुवाद (Hindi Translation)–**

**(क) भारतीय विज्ञान**

1. प्राचीन काल में न केवल आणविक अस्त्रों के प्रक्षेपण का ज्ञान था अपितु उनके संहरण का भी ज्ञान था।

2. इन दिव्यास्त्रों का प्रयोग मनुष्यों पर वर्जित था।

3. इन अस्त्रों का प्रयोग होने पर बारह वर्षों तक उस देश में वर्षा नहीं होगी, यह भी ज्ञान था।

**अन्तःप्रसङ्गाः**

**1. वारणावते लाक्षागृहात् पाण्डवानां रक्षा**–दुर्योधनस्य आदेशेन पुरोचनः वारणावते आग्नेयं लाक्षागृहम् अरचयत्। धृतराष्ट्रः पाण्डवान् वारणावतं प्रेषयामास। लाक्षागृहदाहानन्तरं रात्रौ पाण्डवाः माता कुन्ती च चलितुमसमर्था आसन्। तदा महाबली भीमः जननीं स्कन्धमारोप्य, नकुलसहदेवौ अङ्केन, भ्रातरौ च पाणिभ्यां गृहीत्वा सुरङ्गमार्गेण गंगामुत्तीर्य वनं प्रविष्टः।

**हिंदी अनुवाद (Hindi Translation)–**

**वारणावत में लाक्षागृह से पाण्डवों की रक्षा**–दुर्योधन के आदेश से पुरोचन ने वारणावत में अग्नि से जलने वाले लाख निर्मित घर की रचना की। धृतराष्ट्र ने पाण्डवों को वारणावत भेज दिया। लाक्षाघर के जलने के बाद रात्रि में माता कुन्ती और पाण्डव भाई चलने में असमर्थ थे। तब महाबली भीम ने माता को कन्धे पर बिठाकर, नकुल, सहदेव को गोद में तथा दोनों भाइयों को हाथों में उठाकर सुरंग के मार्ग से गंगा में उतरकर वन में चले गए थे।

**2. कीचकवधः**–अज्ञातवासे द्रौपदी राज्ञ्याः सुदेष्णायाः सेवायां नियुक्ता आसीत्। राज्ञ्याः भ्राता कीचकः राज्ञः सेनापतिः आसीत्। स द्रौपदीं कुदृष्ट्या पश्यति स्म। अन्ते भीमः तस्य वधं कृत्वा द्रौपदीं रक्षितवान्।

**हिंदी अनुवाद (Hindi Translation)–**

**कीचकवध**–अज्ञातवास में द्रौपदी रानी सुदेषणा की सेवा में नियुक्त थी। रानी का भाई कीचक राजा का सेनापति था। वह द्रौपदी को कुदृष्टि से देखता था। अन्त में भीम ने उसका वध करके द्रौपदी की रक्षा की।

**3. अर्जुनाय दिव्यास्त्रप्रदानम्**–(क) भगवता शङ्करेण दिव्यं पाशुपतमस्त्रं संहारविधिपूर्वकम् अर्जुनाय दत्तम्। अस्य प्रयोगः मानुषेषु नैव कर्तव्यः इति भगवान् शङ्करः अपि उपदिष्टवान्।

(ख) अर्जुनः इन्द्रलोकं गत्वा देवशत्रून् हत्वा दिव्यानि अस्त्राणि प्राप्तवान्। यदा स तेषां प्रदर्शनं कर्तुमिच्छति स्म तदा नारदः, आगत्य अवदत् (महाभारतम् वनपर्व)।

**अर्जुनार्जुन मा युङ्क्ष्व दिव्यान्यस्त्राणि भारत।**
**नैतानि निरधिष्ठाने प्रयुज्यन्ते कथञ्चन॥ 175/19**

**एतानि रक्ष्यमाणानि धनञ्जय! यथागमम्।**
**बलवन्ति सुखार्हाणि भविष्यन्ति न संशयः॥ 175/21**

**अरक्ष्यमाणान्येतानि त्रैलोक्यस्यापि पाण्डव।**
**भवन्ति स्म विनाशाय, मैवं भूयः कृथाः क्वचित्॥ 175/22**

**हिंदी अनुवाद (Hindi Translation)–**

**अर्जुन को दिव्यास्त्र देना**–(क) भगवान शंकर ने अर्जुन को दिव्य पाशुपतास्त्र विधिपूर्वक दिया था। उन्होंने यह भी उपदेश दिया था कि इसका प्रयोग मनुष्यों पर न करना।

(ख) अर्जुन ने इन्द्रलोक जाकर देवताओं के शत्रुओं को मारकर दिव्य अस्त्र प्राप्त किए थे। जब वह उनका प्रदर्शन करना चाहता था तब नारद ने आकर कहा–

अर्जुन, इन दिव्य अस्त्रों का प्रयोग अनुचित स्थान पर मत करना। हे धनञ्जय! ये अस्त्र आगमों के समान रक्षणीय, शक्तिशाली व सुखदायक होते हैं। इनकी रक्षा न करने पर ये तीनों लोकों के विनाश का कारण बन जाते हैं।

**भाषाविस्तारः**

**1. विभक्तिप्रयोगः**

| | |
|---|---|
| (क) अभितः परितः समया निकषा प्रति विना धिक् योगे अनु + गम्, अनु + सृ, अनु + धाव्, अनु + वृत् आदिनां योगेऽपि | द्वितीया |
| (ख) साकं सार्धं समं सह अलम (मा इत्यर्थे) किं, किं क्रियते, किं प्रयोजनम्, कोऽर्थः को गुणः। | तृतीया |
| (ग) अलं (समर्थ इत्यर्थे) दा, क्रुध्, द्रुह्, ईर्ष्य्, आदीनां योगे | चतुर्थी |
| (घ) बहिः जुगुप्सते, विरमति, बिभेति, शिक्षते आदीनां योगे | पञ्चमी |
| (ङ) क्त योगे यथा रामस्य भाषितं (संज्ञापदम्), परं रामेण भाषितम् (क्रियापदम्), निर्धारणे आदीनां योगे | षष्ठी |
| (च) स्निह् अनुरञ्ज्, विश्वस् अभिलष् योगे | सप्तमी |
| (छ) विना योगे द्वितीया, तृतीया एवं पञ्चमी भवति। | |

**हिंदी अनुवाद (Hindi Translation)–भाषाविस्तार**

(क) अभितः (दोनों तरफ) परितः (चारों तरफ) समया (पास) निकषा (पास) प्रति (की तरफ) विना (बिना) धिक् (धिक्कार) आदि के योग में द्वितीय विभक्ति का प्रयोग होता है। इसी प्रकार अनु + गम् (पीछे जाना), अनु + सृ (पीछे जाना), अनु + धाव् (पीछे दौड़ना) आदि धातुओं के योग में भी द्वितीया होती है।

(ख) साकम् (साथ में) सार्धम् (साथ में) समम् (साथ) सह (साथ) अलम् (मत करो) के योग में तृतीया होती है।

(ग) अलम् (समर्थ), दा (देना), क्रुध् (क्रोध करना), द्रुह् (द्रोह करना), ईर्ष्य् (ईर्ष्या करना) आदि के योग में चतुर्थी होती है।

(घ) बहिः (बाहर) जुगुप्सते (घृणा) विरमते (रुकता है) बिभेति (डरता है) शिक्षते (सीखता है) आदि धातुओं के योग में पंचमी विभक्ति का प्रयोग होता है।

(ङ) क्त प्रत्यय के योग में षष्ठी विभक्ति का प्रयोग होता है।

(च) स्निह् (स्नेह करना) अनुरञ्ज् (प्रेम करना) विश्वस् (विश्वास करना) अभिलष् (इच्छा करना) आदि के योग में सप्तमी विभक्ति का प्रयोग होता है।

(छ) विना शब्द के योग में द्वितीया, तृतीया व पंचमी का प्रयोग होता है।

| | | |
|---|---|---|
| **I. अलम् योगे** | 1. अर्जुनः **शत्रुभ्यः** अलम्। | चतुर्थी |
| | 2. परमास्त्रं **ब्रह्मास्त्राय** अलम्। | चतुर्थी |
| **सह योगे** | 1. अर्जुनः **युधिष्ठिरेण** सह गच्छति। | तृतीया |
| | 2. नकुलः **भीमेन** सह गच्छति। | तृतीया |
| **विश्वस् योगे** | 1. भीमः **द्रोणपुत्रे** न विश्वसिति। | सप्तमी |
| | 2. द्रौपदी **भीमे** विश्वसिति। | सप्तमी |
| **दानार्थे** | 1. अश्वत्थामा **श्रीकृष्णाय** ब्रह्मास्त्रं दातुम् इच्छति। | चतुर्थी |
| | 2. शरः **अर्जुनाय** ब्रह्मास्त्रं यच्छति। | चतुर्थी |
| **नमः योगे** | 1. नमः **आचार्यपुत्राय**। | चतुर्थी |
| | 2. नमः **भ्रातृभ्यः**। | चतुर्थी |

**हिंदी अनुवाद (Hindi Translation)–**

**अलम् के योग में चतुर्थी–**

1. अर्जुन शत्रुओं के लिए पर्याप्त है।
2. परमास्त्र ब्रह्मास्त्र के लिए पर्याप्त है।

**सह के योग में तृतीया–**

1. अर्जुन युधिष्ठिर के साथ जाता है।
2. नकुल भीम के साथ जाता है।

**विश्वस् के योग में सप्तमी–**

1. भीम द्रोणपुत्र पर विश्वास नहीं करता।
2. द्रौपदी भीम पर विश्वास करती है।

**दान के अर्थ में चतुर्थी–**

1. अश्वत्थामा श्रीकृष्ण को ब्रह्मास्त्र देना चाहता है।
2. शंकर अर्जुन को ब्रह्मास्त्र देते हैं।

**नमः के योग में चतुर्थी–**

1. आचार्य पुत्र को नमस्कार।
2. भाइयों को नमस्कार।

**II. (क) वाक्येषु 'क्त-प्रत्यय' स्थाने 'क्तवतु' प्रत्ययस्य प्रयोगः**

(क) मम प्रियः अर्जुनः अपि चक्रं न याचितवान्।
(ख) अहं देवदानवपूजितं चक्रं याचितवान्।
(ग) कीदृशम् अनर्थं गुरुः कृतवान्।
(घ) अहं तं दृष्ट्वा पृष्टवान्।
(ङ) सः किं नु उक्तवान्।
(च) अहं तु अस्त्रं शमयितुम् अस्त्रं विमुक्तवान्।

**हिंदी अनुवाद (Hindi Translation)–**

**(क) वाक्यों में 'क्त' प्रत्यय के स्थान पर 'क्तवतु' प्रत्यय का प्रयोग–**

(क) मेरे प्रिय अर्जुन ने भी चक्र नहीं माँगा।
(ख) मैंने देवताओं और दानवों द्वारा पूजा गया चक्र माँगा।
(ग) गुरु ने कैसा अनर्थ कर दिया।
(घ) मैंने उसे देखकर पूछा।
(ङ) उसने क्या कहा।
(च) मैंने तो अस्त्र को शान्त करने के लिए अस्त्र छोड़ा था।

**II. (ख) वाक्येषु 'क्तवतु' स्थाने 'क्त' प्रयोगः**

(क) त्वया एव विपद्ग्रस्ता अहम् उद्धृता।
(ख) पुत्रेण अस्त्रं शिक्षितुं पिता प्रार्थितः।
(ग) द्रौणिना मे पुत्राः हताः।
(घ) गुरुणा बालकेषु विश्वासः कृतः।
(ङ) मया सः उक्तः।
(च) तैः कदापि मानुषेषु अस्त्रं न प्रयुक्तम्।

**हिंदी अनुवाद (Hindi Translation)–**

**(ख) वाक्यों में 'क्तवतु' प्रत्यय के स्थान पर 'क्त' प्रत्यय का प्रयोग–**

(क) तुम्हारे द्वारा ही विपत्तिग्रस्त मैं बचाई गई थी।
(ख) पुत्र के द्वारा अस्त्र सिखाने के लिए पिता से प्रार्थना की गई।
(ग) द्रौणी के द्वारा मेरे पुत्र मार दिए गए।
(घ) गुरु के द्वारा बालकों पर विश्वास किया गया।
(ङ) मेरे द्वारा उसे कहा गया।
(च) उनके द्वारा कभी भी मनुष्यों पर अस्त्र का प्रयोग नहीं किया गया।

## परीक्षोपयोगी अन्य महत्त्वपूर्ण प्रश्नोत्तराणि

1. (अ) अधोलिखित नाट्यांश पठित्वा प्रश्नान् उत्तरत– 5

**श्रीकृष्णः** – वत्स! न जानाति भवान् द्रौणेः चपलां प्रकृतिम्। पितुःद्रोणात् प्राप्तं ब्रह्मशिरो नाम अस्त्रं विद्यते तस्य पार्श्वे। यदि तत् प्रयुज्यते, सर्वा पृथ्वी दग्धा स्यात्।

**युधिष्ठिरः** – अप्येवम्! आचार्येण कीदृशः अनर्थः कृतः किं चपलबालकेभ्यः एतादृश-भीषणानाम् अस्त्राणां प्रदानं उचितम्?

**श्रीकृष्णः** – शृणु तावत्, आचार्येण तु प्रियशिष्याय अर्जुनाय एव प्रीत्या मनसा ब्रह्मास्त्रशिक्षा प्रदत्ता किन्तु पुत्रप्रेमपराधीनेन तेन अश्वत्थामा अपि तच्छिक्षया वञ्चितः न कृतः।

**अर्जुनः** – अपरं च, अस्त्रशिक्षाप्रदानात् पूर्वं आचार्यः पुत्रं सावधानम् अकरोत् यत्–

**परमापद्गतेनापि नैव तात! त्वया रणे।**
**इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः॥**

**I. एकपदेन उत्तरत–** ½ × 2 = 1

(*i*) आचार्यद्रोणः प्रीत्या मनसा कस्मै ब्रह्मशिरः नाम अस्त्रम् अशिक्षयत्?
(*ii*) द्रौणेः प्रकृतिः कीदृशी आसीत्?

**II. पूर्णवाक्येन उत्तरत–** 1 × 2 = 2

(*i*) आपद्गतेनापि ब्रह्मास्त्रम् केषु न प्रयोक्तव्यम्?
(*ii*) यदि ब्रह्मशिरो नाम अस्त्रम् प्रयुज्यते, तर्हि किं भवेत्?

**III. भाषिककार्यम्–** ½ × 4 = 2

(*i*) नाट्यांशे 'भवान्' पदं कस्मै प्रयुक्तम्?
(क) श्रीकृष्णाय (ख) अर्जुनाय (ग) युधिष्ठिराय (घ) भीमाय
(*ii*) 'अस्त्राणाम्' इति पदस्य विशेषणपदं किम् अस्ति?
(क) एतादृश-भीषणानाम् (ख) सरलानाम् (ग) भीषणानाम् (घ) हितकारकाणाम्
(*iii*) नाट्यांशे 'धरा' पदस्य कः पर्यायः आगतः?
(क) सर्वा (ख) पृथ्वी (ग) पृथिवी (घ) दग्धा
(*iv*) 'दूरे' पदस्य कः विपर्ययः अत्र लिखितः?
(क) समीपे (ख) निकटे (ग) निकषा (घ) पार्श्वे

**उत्तराणि–** I. (*i*) अर्जुनाय (*ii*) चपला
II. (*i*) आपद्गतेनापि ब्रह्मास्त्रम् मानुषेषु न प्रयोक्तव्यम्।
(*ii*) यदि ब्रह्मशिरो नाम अस्त्रम् प्रयुज्यते तर्हि सर्वा पृथ्वी दग्धा स्यात्।
III. (*i*) (ग) युधिष्ठिराय (*ii*) (क) एतादृश-भीषणानाम् (*iii*) (ख) पृथ्वी (*iv*) (घ) पार्श्वे

(आ) अधोलिखितनाट्यांशं पठित्वा प्रश्नान् उत्तरत– 5

**युधिष्ठिरः** – सम्प्रति आश्वस्तः अस्मि। मन्ये सः ब्रह्मास्त्रप्रयोगं न करिष्यति।

**श्रीकृष्णः** – तर्हि न जानासि तस्य मनोवृत्तिम् पितुः उपदेशेन असन्तुष्टः सः (अश्वत्थामा) एकदा द्वारकापुरीम् आगच्छत्। ब्रह्मास्त्रं दत्त्वा स सुदर्शनचक्रम् अवाञ्छत्।

**युधिष्ठिरः** – (साश्चर्यम्) कथं चक्रम् इति।

**श्रीकृष्णः** – आम्, मया कथितम्। नाहं त्वत्तः (द्रौणिनः) ब्रह्मास्त्रम् इच्छामि। यदि त्वं मम गदां शक्तिं धनुः, चक्रं वा इच्छसि तुभ्यं ददामि।

**युधिष्ठिरः** – ततस्ततः।

**श्रीकृष्णः** – स तु चक्रम् एव अयाचत। गृहाण चक्रम् इति उक्तः सः सव्येन पाणिना चक्रं गृहीतवान् किन्तु सः तत् चक्रं स्वस्थानात् संचालयितुम् अपि समर्थः न अभवत्।

**युधिष्ठिरः** – जानीमः भवतः दिव्यां शक्तिम्।

**I. एकपदेन उत्तरत–** ½ × 4 = 2

(*i*) पितुः उपदेशेन असन्तुष्टः कः द्वारकापुरीम् अगच्छत्?
(*ii*) ब्रह्मास्त्रं दत्त्वा अश्वत्थामा श्रीकृष्ण किम् अयाचत?
(*iii*) श्रीकृष्णः कस्मात् ब्रह्मास्त्रं न इच्छति स्म?
(*iv*) अश्वत्थामा कस्य चक्रं गृहीत्वा अपि चालयितुं शक्यः नाभवत्?

**II. पूर्णवाक्येन उत्तरत–** 1 × 1 = 1

चक्रं गृहीत्वा अपि सः किं कर्तुं समर्थः न अभवत्?

**III. भाषिककार्यम्–** ½ × 4 = 2

(*i*) वामेन इति पदस्य समानार्थकं पदं लिखत।
(क) पाणिना (ख) सव्येन (ग) दक्षिणेन (घ) उत्तरेण
(*ii*) 'त्वत्तः' इति पदं कस्मै प्रयुक्तम्?
(क) द्रौणिने (ख) युधिष्ठिराय (ग) भीमाय (घ) अर्जुनाय
(*iii*) 'आश्चर्येण सहितम्' इत्यस्य स्थाने किं पदं संवादे प्रयुक्तम्?
(क) अनाश्चर्यम् (ख) निराश्चर्यम् (ग) साश्चर्यम् (घ) नाश्चर्यम्
(*iv*) 'खिन्नं द्रौणिम्' अनयोः पदयोः किं विशेषणपदम्?
(क) द्रौणिम् (ख) द्रौणिः (ग) खिन्नः (घ) खिन्नं

**उत्तराणि–** I. (*i*) अश्वत्थामा (*ii*) सुदर्शनचक्रम् (*iii*) द्रौणिनः (*iv*) श्रीकृष्णस्य
II. चक्रं गृहीत्वा अपि सः तत् चक्रं स्वस्थानात् संचालयितुम् अपि समर्थः न अभवत्।
III. (*i*) (ख) सव्येन (*ii*) (क) द्रौणिने (*iii*) (ग) साश्चर्यम् (*iv*) (घ) खिन्नं।

**(इ) अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत–** 5

(ततः युधिष्ठिरार्जुनौ श्रीकृष्णेन सह रथारोहणं नाटयतः।)

**अश्वत्थामा** – रे दुष्ट भीम! त्वम् अद्य वध्योऽसि मया। (विलोक्य) अये कथं श्रीकृष्णार्जुनौ युधिष्ठिरश्च? (स्वगतम्) इदानीं किं करवाणि? आः दृष्टम्, अस्मिन् विषमे समये ब्रह्मास्त्रम् एव मे शरणम्। मोचयामि अस्त्रम्। ध्यानं नाटयति ब्रवीति च। इदम् अपाण्डवाय।

**श्रीकृष्ण** – पार्थ पश्य, पश्य, एतद् विमुच्यते ब्रह्मास्त्रं द्रोण पुत्रेण! त्रैलोक्यं दहन् इव प्रचण्डज्वालः अग्निः परितः प्रसरति। अर्जुन! अर्जुन! त्वमपि मुञ्च ब्रह्मास्त्रं एतत् निवारयितुम्।

**अर्जुनः** – नमः भगवते। स्वस्ति आचार्यपुत्राय। स्वस्ति मे भ्रातृभ्यः। उत्सृज्यते मया ब्रह्मास्त्रम्। अस्त्रम् अस्त्रेण शाम्यताम्।

(ततः प्रविशतः व्यासनारदौ)

**नारदः** – (व्यासं प्रति) पश्यतु भवान्। कोऽयम् अनर्थः क्रियते एताभ्यां वीराभ्याम्। समन्तात् वर्धमानाः प्रचण्डानलशिखाः आकाशं लिहन्ति इव। गगनात् सहस्रशः उल्काः भूमौ पतन्ति कम्पते खलु सपर्वत-वन-द्रुमा सकला मही। पवनः स्तब्धः जातः। सहस्रांशुः न भासते। शैलाः विदीर्यन्ते। कथमपि एतौ निवारणीयौ, अन्यथा सकलं जगद् ध्वस्तं भविष्यति।

**I. एकपदेन उत्तरत–** ½ × 2 = 1

(*i*) ब्रह्मास्त्रं संहर्तुम् कौ कथयतः?

(*ii*) कीदृशी मही कम्पते?

**II. पूर्णवाक्येन उत्तरत–** 1 × 2 = 2

(*i*) अश्वत्थामा किं कथयित्वा ब्रह्मास्त्रं मुञ्चति?

(*ii*) ब्रह्मास्त्रे मोचिते सति काः आकाशं लिहन्ति?

**III. भाषिककार्यम्–** ½ × 4 = 2

(*i*) 'सहस्रशः उल्काः भूमौ पतन्ति' अस्मिन् वाक्ये किं विशेषणपदम् अस्ति?

(क) उल्काः (ख) भूमौ (ग) सहस्रशः (घ) पतन्ति

(*ii*) 'उत्सृज्यते' इति क्रियापदस्य समानार्थकं पदं नाटकांशात् विचित्य लिखत।

(क) विमुच्यते (ख) भासते (ग) विदीर्यन्ते (घ) क्रियते

(*iii*) 'कम्पते' इति क्रियायाः अत्र कर्तृपदं किम्?

(क) मही (ख) सपर्वत (ग) सकला (घ) द्रुमा

(*iv*) नाट्यांशे 'मम' पदस्य कः पर्यायः प्रयुक्तः?

(क) मया (ख) त्वमपि (ग) मे (घ) ते

**उत्तराणि–** I. (*i*) नारदव्यासौ (*ii*) सपर्वत-वन-द्रुमा-सकला।

II. (*i*) 'इदम् अपाण्डवाय' इति कथयित्वा अश्वत्थामा ब्रह्मास्त्रं विमुञ्चति।

(*ii*) ब्रहमास्त्रं मोचिते सति समन्तात् वर्धमानाः प्रचण्डानलशिखाः आकाशं लिहन्ति।

III. (*i*) (ग) सहस्रशः (*ii*) (क) विमुच्यते (*iii*) (क) मही (*iv*) (ग) मे।

**(ई) अधोलिखितनाट्यांशं पठित्वा प्रश्नान् उत्तरत–** 5

(ततः पुत्रशोकसन्तप्ताः युधिष्ठिरः भीमः द्रौपदी च रणभूमौ प्रविशन्ति)

**द्रौपदी** – (दीर्घं निश्वस्य) हा हन्त! किम् इदं घोरम् आपतितम्। पापकर्मणा द्रौणिना मे पुत्राः भ्रातरः च हताः। अग्निः इव दहति माम् अयं शोकः।

**युधिष्ठिरः** – शुभे! धैर्यं धारय। नूनं तव पुत्राः वीरगतिम् एव प्राप्ताः। वीरजननी त्वं शोचितुम् न अर्हसि।

**द्रौपदी** – कथं मन्दभाग्या अहं धैर्यं धारयामि? यावत् असौ क्रूरकर्मा न दण्ड्यते तावत् अहम् इतः न गमिष्यामि, अत्रैव प्राणत्यागं च करिष्यामि।

**युधिष्ठिरः** – प्रिये! मा मैवं ब्रूयाः। स पापकर्मा कुत्र गतः, इति न जानीमः। अतिदूरं किञ्चिद् दुर्गम वनं वा प्रविष्टः भवेत्।

**द्रौपदी** – (भीमसेनं प्रति) आर्यपुत्र! क्षत्रधर्मम् अनुसारन् मां शोकसागरात् रक्ष। अस्मिन् संसारे कश्चित् अपि त्वया सदृशः पराक्रमी नास्ति। पुरा वारणावते त्वमेव पाण्डवान् रक्षितवान्। विराटनगरे अपि त्वं मां प्राणसंकटात् उद्धृतवान्। त्वमेव विपद्ग्रस्तां मामुद्धृतवान्।

**भीमसेनः** – (युधिष्ठिरम् प्रति) भ्रातः! द्रौणिम् अनुगन्तुं मह्यम् अनुमतिं ददातु भवान्।

**युधिष्ठिरः** – गच्छ वत्स! विजयी भव, नकुलः तव सारथि भवतु।

(भीमसेनः निर्गच्छति, श्रीकृष्णः अर्जुनेन सह प्रविशति)

**I. एकपदेन उत्तरत–** ½ × 2 = 1

(*i*) कस्याः पुत्राः भ्रातरः च हताः?

(*ii*) तस्याः पुत्राः भ्रातरः च कीदृशीं गतिं प्राप्ताः?

**II. पूर्णवाक्येन उत्तरत–** 1 × 2 = 2

(*i*) केन सदृशः पराक्रमी अन्यः कोऽपि न आसीत्?

(*ii*) भीमसेनः कम् अनुगन्तुम् उद्यतः भवति?

**III. भाषिककार्यम्–** ½ × 4 = 2

(*i*) 'यावत् असौ' अत्र 'असौ' पदं कस्मै प्रयुक्तम्?

(क) द्रोणपुत्राय (ख) द्रोणाय (ग) दुर्योधनाय (घ) दुःशासनाय

(*ii*) 'अनल:' पदस्य समानार्थकं पदं नाट्यांशात् चित्वा लिखत।

(क) अनिल: (ख) अग्नि: (ग) हुताशन: (घ) शोक:

(*iii*) 'अयं शोक:' इत्यस्य कर्तृपदस्य क्रियापदं किम्?

(क) आपतति (ख) ज्वालयति (ग) प्रद्यक्ष्यति (घ) दहति

(*iv*) अन्तिमे वाक्ये अव्ययपदं किम्?

(क) श्रीकृष्ण: (ख) अर्जुनेन (ग) सह (घ) निर्गच्छति

**उत्तराणि–** I. (*i*) द्रौपद्या: (*ii*) वीरगतिम्

II. (*i*) भीमेन सदृश: पराक्रमी अन्य: कोऽपि न आसीत्।

(*ii*) भीमसेन: द्रोणपुत्रम् अनुगन्तुम् उद्यत: भवति।

III. (*i*) (क) द्रोणपुत्राय (*ii*) (ख) अग्नि: (*iii*) (घ) दहति (*iv*) (ग) सह।

**2. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं पुन: लिखत–** **½ × 8 = 4**

(*i*) इदं दृष्ट्वा अश्वत्थामा ब्रह्मास्त्रं मुञ्चति।

(*ii*) एतम् अनर्थं दृष्ट्वा नारदव्यासौ तत्रागच्छत:।

(*iii*) युधिष्ठिर: भीमं नकुलेन सह द्रौणिम् अनुगन्तुम् कथयति।

(*iv*) द्रौणिना द्रौपद्या: भ्रातर: पुत्रा: च हता:।

(*v*) इदं दृष्ट्वा अश्वत्थामा ब्रह्मास्त्रं मुञ्चति।

(*vi*) तौ विश्वस्य संरक्षणार्थं दिव्यम् अस्त्रं संहर्तुम् कथयत:।

(*vii*) द्रौपदी द्रौणपुत्रं दण्डयितुम् कथयति।

(*viii*) श्रीकृष्ण: युधिष्ठिरार्जुनाभ्यां सह युद्धक्षेत्रे गच्छति।

**उत्तराणि–** (*i*) द्रौणिना द्रौपद्या: भ्रातर: पुत्रा: च हता:।

(*ii*) द्रौपदी द्रौणपुत्रं दण्डयितुम् कथयति।

(*iii*) युधिष्ठिर: भीमं नकुलेन सह द्रौणिम् अनुगन्तुम् कथयति।

(*iv*) श्रीकृष्ण: युधिष्ठिरार्जुनाभ्यां सह युद्धक्षेत्रे गच्छति।

(*v*) इदं दृष्ट्वा अश्वत्थामा ब्रह्मास्त्रं मुञ्चति।

(*vi*) अर्जुन: अपि एतत् निवारयितुम् ब्रह्मास्त्रं मुञ्चति।

(*vii*) एतम् अनर्थं दृष्ट्वा नारदव्यासौ तत्रागच्छत:।

(*viii*) तौ विश्वस्य संरक्षणार्थं दिव्यम् अस्त्रं संहर्तुम् कथयत:।

**3. अधोलिखित अंशस्य भावम् मञ्जूषाया: उपयुक्तशब्दै: पूरयत–**

**(क) कथं चपलेषु बालकेष्वपि गुरुणा भीषणास्त्र-प्रयोग-शिक्षणार्थं विश्वास: कृत:।** **1 × 4 = 4**

**भाव–** द्रोणस्य पुत्र: (*i*) .................... असंयमित: बालक: आसीत्। ब्रह्मास्त्रम् अतीव (*ii*) .................... अस्त्रम् आसीत्। तदा गुरुणा किमर्थं (*iii*) .................... भीषणास्त्रस्य शिक्षणम् उचितम् मत्वा तस्मिन् (*iv*) .................... कृत:।

**मञ्जूषा–** द्रौणिने, विश्वास:, अश्वत्थामा, भीषणम्

**उत्तराणि–** (*i*) अश्वत्थामा (*ii*) भीषणम् (*iii*) द्रौणिने (*iv*) विश्वास:

**(ख) पाण्डवास्त्वं च राष्ट्रं च सदा संरक्ष्यमेव हि।**

**तस्मात् संहर दिव्यं त्वमस्त्रमेतन्महाभुज!॥** **1 × 4 = 4**

**भाव–** व्यास: द्रोणपुत्रम् अस्त्रं संहर्तुम् आदिशति–येन (*i*) .................... त्वं च राष्ट्रं च रक्षितौ: भवेताम्। हे (*ii*) ....................! द्रोणपुत्र! त्वम् आत्मन: अलौकिकम् (*iii*) .................... शीघ्रं संहर येन कस्यचिदपि (*iv*) .................... न भवेत्। सर्वेषां च रक्षा भवेत्।

**मञ्जूषा–** हानिः, अस्त्रेण, अस्त्रं, महाभुज

**उत्तराणि–** (*i*) अस्त्रेण (*ii*) महाभुज (*iii*) अस्त्रं (*iv*) हानिः

**4. अधोलिखितपङ्क्तिषु स्थूलाक्षरपदानाम् प्रसङ्गानुसारम् शुद्धम् अर्थम् चिनुत–** **1 × 2 = 2**

(*i*) **द्रौणिना** मे पुत्राः भ्रातरः च हताः।

(क) द्रोणाचार्येण (ख) द्रोणपुत्रेण (ग) विद्रोहिणा (घ) द्रोणः

(*ii*) तेन हि **अनुजानातु** माम् आर्यः।

(क) अनुमतिम् ददातु (ख) पश्चात् आगच्छतु (ग) अवगच्छतु (घ) जानातु

**उत्तराणि–** (*i*) (क) द्रोणपुत्रेण (*ii*) (क) अनुमतिम् ददातु

**5. अधोलिखितश्लोकयोः मञ्जूषायाः अन्वयं समुचितक्रमेण पूरयत्–** **½ × 2 = 4**

**(अ) प्रार्थितं ते मया चक्रं देवदानवपूजितम्।**
**अजेयः स्यामिति विभो! सत्यमेतद् ब्रवीमि ते॥** **½ × 4 = 2**

**मञ्जूषा–** चक्रं, स्याम्, सत्यं, एतत्

**अन्वयः–** विभो! अजेयः (*i*) .................... इति मया देवदानवपूजितम् (*ii*) .................... ते प्रार्थितम् (*iii*) .................... ते (*iv*) .................... ब्रवीमि।

**उत्तराणि–**(अ) (*i*) स्याम् (*ii*) चक्रं (*iii*) एतत् (*iv*) सत्यं

**(आ) अस्त्रं ब्रह्मशिरो यत्र परमास्त्रेण वध्यते।**
**समाः द्वादश पर्जन्यस्तद् राष्ट्र नाभिवर्षति॥** **½ × 4 = 2**

**अन्वयः–** यत्र ब्रह्मशिरः (*i*) .................... परम-अस्त्रेण वध्यते (*ii*) .................... द्वादशसमाः तद् (*iii*) .................... न (*iv*) ....................।

**मञ्जूषा–** पर्जन्यः, अभिवर्षति, राष्ट्रं, अस्त्रं

**उत्तराणि–**(*i*) अस्त्रं (*ii*) पर्जन्यः (*iii*) राष्ट्रं (*iv*) अभिवर्षति

**6. अधोलिखितकथनेषु रेखाङ्कितपदानि आधृत्य प्रश्न-निर्माणं कुरुत–** **1 × 4 = 4**

(*i*) भीमः एकाकी **द्रोणपुत्राय** अलम्।

(क) कः (ख) काय (ग) कस्मै (घ) कस्यै

(*ii*) द्रौणिः श्रीकृष्णं **चक्रम्** अयाचत।

(क) कम् (ख) किम् (ग) काम् (घ) कानि

(*iii*) **द्रौपद्याः** पुत्राः द्रोणपुत्रेण हताः।

(क) कया (ख) कया कस्य (ग) कयाः (घ) कस्याः

(*iv*) **सपर्वत-वन-द्रुमा** सकला मही कम्पते।

(क) का (ख) कीदृशा (ग) काः (घ) कीदृशी

**उत्तराणि–** (*i*) (ग) कस्मै (*ii*) (ख) किम् (*iii*) (घ) कस्याः (*iv*) (घ) कीदृशी

**7. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरपुस्तिकायाम् उत्तरत–** **5**

**भीमः** – (युधिष्ठिरं प्रति) भ्रातः! द्रौणिम् अनुगन्तुं मह्यम् अनुमतिं ददातु भवान्।

**युधिष्ठिरः** – गच्छ वत्स! विजयी भव। नकुलः तव सारथिः भवतु। (**भीमसेनः** निर्गच्छति, **श्रीकृष्णः** अर्जुनेन सह प्रविशति)।

**श्रीकृष्णः** – भो धर्मराज! समीचीनं न कृतं भवता। पुत्र-शोक-विह्वलः भीमसेनः एकाकी एव द्रौणिं हन्तुम् अभिधावति।

**युधिष्ठिरः** – भगवन्! स एकाकी एव द्रोणपुत्राय अलम्।

**श्रीकृष्णः** – वत्स! न जानाति भवान्! द्रोणपुत्रस्य चपलां प्रकृतिम्। पितुः द्रोणात् प्राप्तं ब्रह्मशिरो नाम अस्त्रं विद्यते तस्य पार्श्वे। यदि तत् प्रयुज्यते, सर्वा पृथिवी दग्धा स्यात्।

**I. एकपदेन उत्तरम् उत्तरपुस्तिकायां लिखत–** **½ × 4 = 2**

(*i*) कः एकाकी एव द्रोणपुत्राय अलम् आसीत्?

(*ii*) श्रीकृष्णः युधिष्ठिरं कथं संबोधयति?

(*iii*) भीमः द्रौणिम् अनुगन्तुं कम् अनुमतिं याचते?

(*iv*) भीमस्य सारथिः कः भवति?

**II. पूर्णवाक्येन उत्तरत–** **1 × 1 = 1**

यदि ब्रह्मास्त्रं प्रयुज्यते तदा पृथिवी कीदृशी स्यात्?

**III. निर्देशानुसारम् उत्तरम् उत्तरपुस्तिकायां लिखत–** **½ × 4 = 2**

(*i*) 'दूरे' अस्य विलोमपदं संवादात् चिनुत उत्तरपुस्तिकायां च लिखत।

(क) समीपे (ख) पार्श्वे (ग) अन्तिके (घ) निकटे

(*ii*) 'अश्वत्थामानम्' अस्य किं पर्यायवादिपदं संवादे प्रयुक्तम्?

(क) द्रोणपुत्रम् (ख) द्रौणम् (ग) द्रौणिः (घ) द्रौणिं

(*iii*) 'चपलां प्रकृतिम्' अनयोः किं विशेषणपदम्?

(क) प्रकृतिम् (ख) प्रकृति (ग) चपलाम् (घ) चपला

(*iv*) "भीमः तं हन्तुम् अभिधावति" अत्र क्रियापदं किम्?

(क) अभिधावति (ख) तम् (ग) हन्तुम् (घ) भीमः

**उत्तराणि–** I. (*i*) भीमसेनः (*ii*) वत्स! / भो धर्मराज! (*iii*) युधिष्ठिरम् (*iv*) नकुलः

II. यदि ब्रह्मास्त्रं प्रयुज्यते तदा सर्वा पृथिवी दग्धा स्यात्।

III. (*i*) (ख) पार्श्वे (*ii*) (घ) द्रौणिं (*iii*) (ग) चपलाम् (*iv*) (क) अभिधावति

**8. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरपुस्तिकायाम् उत्तरत–** **5**

**भीम:** – भो धर्मराज! समीचीनं न कृतं भवता। पुत्रशोकविह्वल: भीमसेन: एकाकी एव द्रौणिं हन्तुम् अभिधावति।

**युधिष्ठिर:** – भगवन्! स: तु एकाकी एव द्रोणपुत्राय अलम्।

**श्रीकृष्ण:** – वत्स! न जानाति भवान् द्रौणे: चपलां प्रकृतिम्। पितु: द्रोणात् प्राप्तं ब्रह्मशिरो नाम अस्त्रं विद्यते तस्य पार्श्वे। यदि तत् प्रयुज्यते, सर्वा पृथ्वी दग्धा स्यात्।

**युधिष्ठिर:** – अप्येवम्! आचार्येण कीदृश: अनर्थ: कृत:। किं चपलबालकेभ्य: एतादृश-भीषणानाम् अस्त्राणां प्रदानम् उचितम्?

**I. एकपदेन उत्तरत–** **1 × 2 = 2**

(*i*) द्रौणे: पार्श्वे किं नामकम् अस्त्रम् आसीत्?

(*ii*) भीमसेन: केन विह्वल: आसीत्।

**II. पूर्णवाक्येन उत्तरत–** **1 × 1 = 1**

यदि ब्रह्मास्त्रम् प्रयुज्यते तर्हि पृथ्वी कीदृशी भवेत्?

**III. यथानिर्देशम् उत्तरत–** **½ × 4 = 2**

(*i*) 'धर्मराज' इति सम्बोधन कस्मै प्रयुक्तम्?

(क) पार्थाय (ख) द्रौणिने (ग) युधिष्ठिराय (घ) अर्जुनाय

(*ii*) स तु एकाकी एव। अत्र 'स' सर्वनामपदं कस्मै प्रयुक्तम्?

(क) भीमाय (ख) अर्जुनाय (ग) श्रीकृष्णाय (घ) युधिष्ठिराय

(*iii*) 'मारयितुम्' इति कस्य पदस्य अर्थ:?

(क) ताडयितुम् (ख) प्रशंसितुम् (ग) वक्तुम् (घ) हन्तुम्

(*iv*) 'चपलां प्रकृतिम्' इत्येतयो: किं विशेष्यम्?

(क) चपलाम् (ख) चपला (ग) प्रकृति: (घ) प्रकृतिम्

**उत्तराणि–** I. (*i*) ब्रह्मशिरो (*ii*) पुत्रशोकेन।

II. यदि ब्रह्मास्त्रम् प्रयुज्यते तर्हि पृथ्वी दग्धा भवेत्।

III. (*i*) (ग) युधिष्ठिराय (*ii*) (क) भीमाय (*iii*) (घ) हन्तुम् (*iv*) (घ) प्रकृतिम्

**9. 'क' वर्गस्य पदानां 'ख' वर्गस्य पदै: सह अर्थमेलनं कुरुत–** **½ × 10 = 5**

| **'क' शब्द:** | **'ख' अर्थ:** |
|---|---|
| (1) समीचीनम् | (क) तत्पर: |
| (2) पार्श्वे | (ख) ज्वलिता |
| (3) चपलाम् | (ग) रक्षणस्य योग्यम् |
| (4) विह्वल: | (घ) चञ्चलाम् |
| (5) संरक्ष्यम् | (ङ) वृक्षा: |
| (6) प्रार्थितम् | (च) व्याकुल: |
| (7) उद्यत: | (छ) उचितम् |
| (8) द्रुमा: | (ज) अग्नि-पिण्डा: |
| (9) उल्का: | (झ) समीपे |
| (10) दग्धा | (ञ) याचितम् |

**उत्तराणि–** (1) (छ) उचितम् (2) (झ) समीपे (3) (घ) चञ्चलाम् (4) (च) व्याकुल:
(5) (ग) रक्षणस्य योग्यम् (6) (ञ) याचितम् (7) (क) तत्पर: (8) (ङ) वृक्षा:
(9) (ज) अग्नि-पिण्डा: (10) (ख) ज्वलिता।

## मूल्यपरक प्रश्ना: (VBQs)

**वाक्यानि पठित्वा वाक्याधारितान् प्रश्नाम् उत्तरत–**

**प्रश्ना:** (*i*) 'अग्नि: इव दहति माम् अयं शोक:।' इति वाक्ये केषां शोक: द्रौपदीं दहति?

(*ii*) 'पुरा वारणावते त्वमेव पाण्डवान् रक्षितवान्।' क: वारणावते पाण्डवान् रक्षितवान्?

(*iii*) 'यदि तत् प्रयुज्यते सर्वा पृथ्वी दग्धा स्यात्।' इति वाक्ये कस्य अस्त्रस्य प्रयोगस्य अत्र वर्णनम् अस्ति?

(*iv*) 'अजेय: स्यामिति विभो! सत्यमेतद् ब्रवीमि ते।' इति श्लोकांशे द्रौणि: कं विभु: कथयति?

(*v*) 'कथमपि एतौ निवारणीयौ।' अत्र कयो: अस्त्रयो: निवारणस्य वार्ता भवति?

**उत्तराणि–** (*i*) भ्रातृपुत्राणाम् (*ii*) भीमसेन: (भीम:) (*iii*) ब्रह्मशिर: अस्त्रस्य
(*iv*) श्रीकृष्णम् (*v*) ब्रह्मशिर: ब्रह्मस्त्रयो: